No. १४१४

Title अनुमान चिन्तामणि टीका मूल माथुरी

Author मथुरानाथः

Extent ४२ ४० Age १७८६

Subject न्याय वैशेषिक मू

अनुमानचिंतामणिटीका मूलमाथुरी

१५१४

मापकत्वस्य मिति निष्कारणत्वसंगत्या व्याप्येति रूपि अनुमित्यव्यवधानोपप्रतिसन्धानोपयोगाच्चेति। लिंगपरामर्शत्वमात्मादित्यनेन व्याप्तिपक्ष
धर्मता परामर्श इति वाच्यं। पक्षवयवतावच्छेदकावच्छेदेन परामर्शजनकत्वेन तस्यावच्छेदकत्वात् तत्र त्रैरूप्यहेतोर्न तस्मादिति भागेन बोधना
एवमप्रमाविशेषणलक्षणे ह्युपेत्यय बोध्यं। अवयवत्वमुद्देश्यसमवायरूपतया। न च वह्निमान् इति वह्निमद्भिन्नत्वादिसाध्यकपरामर्शज
नकेऽव्याप्तिरिति वाच्यं। तत्राप्यलक्ष्यत्वस्वीकारात् शिंकाने उदाहरणे तेति न नुमीमांसकेन विशिष्टपरामर्शस्य हेतुत्वेनास्वी
कृतत्वे तथाचोपनयनवैयर्थ्यं हेतुप्रयोजनेकोहेति इत्याशङ्काहृदयस्य परामर्शवैचित्र्यतिं तु तृतीयलिंगपरामर्शस्य कारणत्वानभ्युपगमे चैयर्थ्य
ः पक्षे तितथाचयपक्षधर्मता ज्ञानार्थमुपनयापेक्षेतिभावः। नन्वहेतुत्वेवयवस्यतोत्यर्थः तत्प्रयोजनपाभिधानप्रयोजकज्ञानजनकतेन्यायावयव
पर्व कृतउदासीनवारकं व्यतिरेकेति व्यतिरेकमात्रव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमन्न्यायाव
यवत्वं व्यतिरेकिहेतुत्वमित्यर्थः। व्यावृत्तिः पूर्ववद्बोध्या। अन्वयव्यतिरेकेतिनचैकदा उभयव्याप्त्यभिधानात्कथमेतदिति वाच्यं तहेतु
मपवंवक्रमेणोभयव्याप्त्यभिधानमप्यस्तीत्याशयेनेदं प्रहेत्यादि सतोऽर्थस्यप्रतिपादकहेत्ववयवत्वमर्थः। सरूपासिद्धादिव्यावृत्तहेतुप्र
तिपादकस्य लक्ष्यत्वं तथाचासिद्ध्याद्यन्यमे पक्षेतरतिकेवलव्यतिरेकिव्यावृत्तये सपक्षेसत्तेति केवलान्वयिद्वारणोपवाधितेप
सिवारणाय विषयत्वादिति हेतुः प्रतिपक्षितः सत्यप्येवमपर्व विशेषणावश्यकत्वबोधकत्वमलस्यैव। ननु सपक्ष
त्वनिश्चितसाध्यवत्त्वं निश्चयपक्षे प्रयोक्तुरन्यथासिद्धत्वपापितज्ञानसत्वेपि व्यभिचारादिमात्रप्रयोग इति व्याप्तिः एवं तज्ज्ञा
नं विनोत्वेमुक्तन्यायेन प्रयोगाः कृतत्त्रव्याप्तिरेवं तथा निर्णीतासीत्तत्र व्याप्तिप्रतिचल्ला निर्णीयः प्रयोक्तुरेवउदाहरणो
फलापधानहेतुविवक्षितः मुक्तन्यायपक्षेनलक्ष्य इति बोध्यं। अन्वयवत्वेतिकेवलान्वयीत्यर्थः। केवलान्वयित्वं च वृत्तिमदत्य

ताभावाप्रतियोगित्वं तेनाकाशात्यंताभावसाध्यकसंयद्धेतुः तत्साध्यकयत्ता वृत्तिहेतुवारणायपदमिति। पत्रतत्साध्यकहेतोर्न क्वापि निर्णीय
त्तादृशानुपसंहारि णि सर्वमभिधेयं घटत्वादित्यादावतिव्याप्तिवारणाय पदमिति। नच तस्य तत्सत्त्वमवाच्यं। मरहेतुको धर्मस्यैव ल
क्षणत्वमित्यपि प्राप्तः धूमोपि दृष्टाविशेषकेवलान्वयीति मतेनाह पदेति केवलान्वय्यन्वयव्यतिरेकिणो रेकरूप्येण परिग्रहायाह
अनुमितिति केचित्। उदासीनवा कवारणाय कार णांजन्यापावपवरस्त्रवपवं तरवारणाय साध्यविषयकेति केवलव्यति
रेकि वारणामाप्रतीतितिसाधना धिकरणावृत्तित्सावत्तिता दृशजात्यभावेकेनारूपेणा हेतुत्वमित्यर्थः। ननु वा क्वविशेषजन्यत्वेन हे
तुतात्विकत्वात्तस्माहविशेषेतिचेत्त्रास्वरसबीजं हेतुवाक्यजन्याति विशेषव्याप्तिज्ञानकत्वं अनुगतरूपासत्वेन संभवति तत्तत्वे
तद्वत्वत्त्वानाप्ताति पदं वैकल्प्यापत्तावाह दर्शितं। अन्वयोदाहरणेति व्याप्तिसत्त्यान्वयव्याप्यभिधापकोपनुपयत्योपस्थितसाध्ये
हेत्वर्थान्वयः स्यादित्यर्थः। तदभिधानं अवयवांतराभिधानं तथा चान्योन्याश्रयापत्तेः साध्योपस्थितिरित्यर्थः। अन्ये त्विति। तथा
च शब्दानित्यत्वविशेषणाविशिष्टप्रमाणाभिज्ञापाः विशेषणामनभिधापविशिष्टाभिधानासंभवात्। प्रमाणानुपस्थापकत्वे
तोपन्यासस्त्रावयवकत्वमित्यर्थः। तथा चपरमार्थ्य कसाध्यप्रमाणातिज्ञासायाः शब्दानित्यत्वाविषयकत्वेन तदुपस्थापकस्यानव
श्यकत्वादित्यर्थः। तदसंभवान्तवात्तविकसंभवात्तत्र चत्तगत्याशब्दनित्यत्वाभावेपितदुपलब्धिप्रमाणाभिधानानुयोगित्वसंभ
वतीति शब्दानित्यत्वविशेषितप्रमाणाभिधानएवानुयोग इतिकथं निश्चयमानाभावात्तत्र च विशेषणानवाधएवोपलक्षणात्वकाम
त्वनेनेतिवाच्यं। ननु स्यपुनरभिधानगोरवस्यवाधकत्वात्तपादिचमउक्तहेत्वर्थान्वयानुपपत्या विशेषणांतस्याह। तस

सैव प्रक्रिया रक्तकुक्रिमनेनेत्यत्र स्वरसोऽवबोध्यः। अत एव पूर्वोक्तमुपसंहरति तस्मादिति। अन्यथैतदुक्त्यैऽव्यसंहारासंभवादसंग
तिः स्यात् कुत इति। तथा च तादृशाकांक्षाविरहदायहेतुनाभिधं जन्यहेतुत्वबोधकविभक्तिमत्पदोपन्यासत्रावश्यकरत्वार्थः।
अन्यथैतस्य विवरणात्मकतो कांक्षाभिधान इति। तथैवाभिधानेनैवाहेतुत्वे तिक्कारणात् तमुदासीनवाक्यवारणाय पन्यापाव
पवाघ्यं कूनिगमनवारणायहेतुत्वेनेतरायेति प्रतिज्ञास्यलीपव्यतिरेकमुपनयवारणाय हेतुविभक्तिमदिति। तदर्थस्त्वप
क्ततत्साध्यान्यपक्षमोपस्थितिजनकविभक्तिमत्त्वं हेतुत्वप्रतियाद्यकेति। विभक्त्यर्थे हेतुत्वविशेष्यकबोधजनकत्यापाक्षपक्षत्वमित्य
र्थः। हेतुत्वप्रमेयमिति प्रतिज्ञावारणाय विभक्त्यर्थेति। तत्स्यादिनीत्येऽभिधायते इत्याद्विनिगमनावारणाय हेतुत्वेति। विशेष्येव
साध्यविषयकेति पूर्वोक्तोदाहरणवारणाय व्यतिरेकिमुपनयवारणाय चं चर्पते ति अनुमितिपरेति। उदाहरणवारकेत्यापा
चपवार्थकांकेचित् तु साध्यविषयकत्वोतकत्यापावपूर्वत्वमिति तथा च विप्रतिपत्तिवाक्यसाध्योपस्थितौ कुतः इत्याकांक्षा
यां हेतुत्वाभिधानसंभवादित्यर्थः। विप्रतिपत्तिः किं द्विकोटिकः पक्षपाक्षशब्दः न चापवर्गसाध्यत्वे न कादृश शब्दप्रयोगे कृते
प्रतियादिना एककोटिपरिग्रहे कृते तत्रापकहेतुजिज्ञासायां हेत्वभिधानस्योचितत्वेऽमक्तिं प्रतिज्ञोपन्यासेनेत्यर्थः। विप्रतिप
त्यैव विप्रतिपत्तेनैतस्य सा ध्यसाधमपि तु मुच्चितं तथा च तत्साधनाय प्रतिज्ञोपन्यासस्यावश्यकत्वमिति भावः। ननु प्रथममेव हेत्व
भिधानमस्तु न अादृगेकांक्षाविरहात् किं प्रतिज्ञोपन्यासेनेत्यत आह न चेति। शब्दानित्यत्वे ताप्यतां तत्र प्रमाणं च त्यपात्रमस्तु
मपत्राकांक्षोतितद्धेत्वभिधानेनिग्रहहत्यस्तु तत्साध्यानपानुपपत्तिदूषणमाह न चेति। केचित्तु मानिर्देशं विना साध्योपस्थाप

२

प्र॰ता॰ १

केविनानिष्प्रतियोगिकत्वमन्वयं प्रतितानन्वितसत्त्वार्थं तथा च प्रतिताप्रतिताको हाहि तु चाक्षुष्यावांतरस्वार्थबोधकत्वेपि प्रतीतेर:
पर्पवसानात् तादृक्पर्वबोधनाय प्रतियोग्यमासत्त्वावश्यक इतिस्वार्थः। तत्र च पदादृक्तनुपलब्धिनेपि क्षिद्धे न रत्ववानयोग्यतावलादु
पलब्धिते हेत्वर्थोऽन्वये। नवित्वमीत्यत आह नचेति तस्माविप्रतिपत्तेः अंतरितत्वात तथाचोपलब्धित्वर्थ प्रतियोग्यमात्त्वावश्यक
इतिभावः। मध्यस्थविप्रतिपत्त्यनेन तरंवादिप्रतिवादिनोरल्पकरस्वपक्षपरिग्रहाहेरावश्यकत्वं दर्शयति। परेति निरकांक्षत्वादिति
विप्रतिपत्तिवाक्यस्वपक्षपरिग्राहकतया तदुपलब्धितेऽर्थे हेत्वर्थान्वये आकांक्षाविरहादित्यर्थः। न तु तादृशपदाद्यर्थानापेक्षाहेत्वर्था
न्वयेऽस्त्वित्यत आह। आहत्ताविति तथा चानुसंधानात्तरीव क्षिप्तनादृशपदस्यैव प्रतिज्ञातत्वादित्यर्थः। इदमपि निर्दिशस्येकाको
रत्वमतिप्रसक्तं। वस्तुतस्तु विप्रतिपत्तिवाक्यस्य वह्निपरतया तत्र हेतुत्वान्वयादर्थमवश्यं तावता परवाक्यतया पेक्षणात्।
न च तथापि तत्र ज्ञापकत्वमेव वचनार्थः तथा च वस्तुपरिविप्रतिपत्तिवाक्यार्थेऽन्वयः स्यादिति वाच्यं तादृशसंसर्गकल्पने मा
नाभावात् गौरवाच्च प्रतियोगमपि सत्त्वावश्यकमितिबोध्यं। ननु हेतुहेतुमतोर्हेतुसाध्योपलब्धितो हेत्वर्थान्वयोऽस्त्वित्यत आह न
चेति अवयवांतरेति तथा च साध्यानुपलब्धितो हेत्वर्थान्वये आकांक्षाविरहाद्वयवांतरानुत्पन्नेन स्यादित्याकारकत्व
त्वावच्छिन्नत्वादिति वचो ध्येयं। न च पञ्चम्यर्थतावच्छेदकं परूपं तदेव तत्र तादृशशाब्दतावच्छेदकभिन्नत्वमित्यविरोधः इत्यत आ
ह तद्युक्त्येति बुद्धिस्थबोधकत्वमात्रेणसंगतिः न तु पञ्चम्यर्थतावच्छेदकांशोपीत्यर्थः। विलक्षणरूपेणोपलब्धितयोरपि राम
विलक्षणरूपाभ्यां भेदेन परामर्शः तात्पर्यमात्रे पुनःपदं सिद्धपक्षे शेषाभावादिति भावः। बुद्धिस्थेति तथा च यत्र बुद्धिस्थत्व

च केवलं तत्र युगपद्दृष्टत्वेऽपि रूपविरोधदृष्टत्वर्थम् तमेवार्थं प्रतियोगेन दृष्टव्याप्तिप्रयत्नानुसरणमित्याकलय्य तौ ह्यौ उभयत्रवीस्तातत्रप्र
त्येकघटत्वहेतोपक्षाभावेपि तत्प्रत्येकतत्स्वेहेतुपरामर्शेपि तत्र तत्त्वहेतुपिवीत्वावच्छेदेनानुपपत्त्या तत्तत्त्वे तत्त्वैकतत्वहेतो भयोरूपस्येति
संभवाभावात्तत्त्वहेतौ वीत्वात्प्रयोगानुसारेण तत्पाकलप्य तदिति अव्याप्त्या यत्तत्प्रयोगा पप्रतियोगिमुद्रपा तद्धाभासाना हेतुहेतवे
ति साध्यवत्किल साध्यविकल उभयविकले चेति बोध्यं । तत्र साध्यविकले पक्षाशाहेति स्पोऽ सन्ते त्वाद्याकाशवत शाहेऽ
नित्योगुणत्वात्तद्घटवत् उभयविकले शब्दोऽनित्योगुणत्वाद्वाकाशवत् आश्रयविकले पदार्थं क्रियावत्त्वकपक्षेपि तदहमु
चुत्वापपावाजि विषाणं । अनुपदर्शितान्वयं शब्दोनित्यः कृतकत्वात्घटवत् । अनुपदर्शितव्यतिरेकं आभ्यगुरीरंता तत्कंइ
कृतिमत्त्वात्घटवत् । विपरीतोपदर्शितव्यतिरेकं विपरीतान्वये तत्पदर्शितः व्याप्तिरेकोपक्षेतपो यवदिक्ष्वविरहितं तन्नित्य
त्वकं यथा घट इत्यादि स्वानपिक दृष्टान्तप्रयोगाभिप्रायेण विवक्षितस्क दृष्टान्तं तरे तोऽपृहा हेतुत्वापसाध्यविकलत्वा
दिकं यथा योधूमवान् सइतिसाध्याविकले योयः सवह्निमानिति साधनविकले योयः सहस्तु भयविकले योयोधूमः स
इवह्निरिति साध्यविकले योयोधूमः सवह्निरिति नैव पदर्शिता सिकेहत्वादिकमस्ते । अनुमितीति । अत्र नकां तमवपदार्थ
वारणाय जनकं तत्स्वरूपयोग्यता नपक्षतानुपके नाव्याप्तिः अत्रानुमितिपदस्यानुमितिहेतुत्वे बोध्यं ने नपर्वतो वह्निमान् धूमो
वह्निव्याप्यवान्नादि प्रति तापना तिव्याप्तिः न चनिगमने ऽति व्याप्तिस्तत्रापि पाद्यत्वात तत्र च प्रकारान्तरेण व्यभिचारशंका
विरहे वीप्सा परहानेन यमिति । अनुमानेऽवासाधकता नुमाने व्याप्ते रूपवादिति तद्धि तया तत्रो हाहरणे प्रयोगाभावसावकाश

म.ना. दरणोपसंहारे तत्रापि प्रकारान्तरेण व्यभिचारशंकां निरासे मनस्येव व्याप्तिग्रहस्तं भवतात्। अतएव व्याप्तिरेकेति यन्नैवं तन्नैवं
तन्नैवमिति वीप्सां विनापि प्रयोगः प्राचामिति संगच्छते पदार्थानुकूलव्याप्तिग्रहस्य हावीप्साप्रयोगे इष्टापत्तेर्वी
3 प्सापामपी। तिवीप्सापा सामान्याधिकरण्ये मात्र बोधे नेव्यभिचारशंका तादृश स्य निरासार्थः। व्यापामितिको र्थी चिन्मात्रानुवा
दक्रमेणोक्तं तत्र च तेषां नन्दि मैत्र्यः गएबोक्तमाहुरिति आहुरिसस्वरस्तो द्भावनं तद्धीजं तु वीप्सा प्रयोगानाधिकरणे व्याप्ति
तो प्रागुक्त रीत्या व्यभिचारशंका विरहात्। तदर्थं वीप्सा प्रयोगात्र स्वपक्षइति। अथ केन क्रमेण तस्य व्यभिचारणं का। निवर्त्ति
तव्यमिति चेन्न आह व्याप्तिमत्त पावोधपितुमिच्छा वीप्सा वीप्सिता शाब्दप्रवर्त्तनं तरं अनुवादकापात्त्वेषशाब्दस्य प्रथमो
जनाजिज्ञासापा पोयुतमित बलान्व्याप्तिस्तारूपिकत्वेन हीनव्याप्ति बोधनस्य प्रयोजनतापाये स्यादेप यस्या प्रमित्व पवहृधि
करणे तेन तेन महानसत्व चत्वर त्वादिना महानसात्वेते नाद्धिनी पपत्येनोपस्थाप्यते। एवं क्रमेण सर्वाधिकरणोप
स्थितौ तत्र वह्निमत्व बोधे न व्यभिचार शंकाभावे व्याप्तिग्रहे। मानसइति वस्तुगतिः। बोधप्रमहो न स्तु धूमवान् वह्निमान्
महानसमात्रे हूमवत्वमहानसोन्याद्वह्निमान् धूमात् वा कार्ये वा तु धूप क्रमेण। केचित्तु व्याप्तिमितिक्रमेणोक्तस्याकाश पः
पसहृत्पया पावह्ने धीतुपस्थापनातायाभिचारशंका सत्वे नाथ रंतु पश्योनप्राप्या व्याप्ति क्षितात्त र्थ निपमलेन क्रमे
णव्यभिचारशंकां निरस्य वीप्सापाहेतं व्याप्तिमितिवदंति तन्न भवतु वानुव्याप्ति तु योन व्याये न पत्वदृवीप्सा तथापि तत
त्पहेनएकतत्सदृनएकस्मिदेन पूर्वोपस्थिततया वत्यभ शोसंभवादि मा हवीप्सा चेति। ननु पत्व दृशा कस्मा तावकोहेतुके एम

यत्वं च पक्षेक तत्वद्वाराद् उपस्थितिः सकलहेतुपुरस्कारेणैकवृत्तिविरोधात् अत एव वा हेतुविरूपवैशिष्ट्यविरूपस्थितिर्न योरपि विरुद्धताना
धर्मप्रकारेणोपस्थितयोरपि तथा चैकतरस्य हेतुतावच्छेदकधर्मितोपस्थितिः सन्निवेशविशिष्टमात्रस्य हेतुपाधित्वमित्यर्थः। तच्च यथा हेतु
त्वादिना हेतौ नस चबाधज्ञानविरहापेक्षत्वमिति निरूपितं मुद्रितम् इत्यर्थः। उपनयाद्धेतोर्वचनं तस्य विधायकत्वादेकत्वेनुवाद्यकत्वमिति तेनैव हेतु
हेतावित्यादि हेतुः। साध्यसाधनेति अत्र विसाधननिर्देशः साध्यसाधनमात्राधिकरणपर्वतादौ पक्षत्वमन्वयव्युदाहरणे तेतत
ध्याभाववद्वृत्तित्वपक्षसाधनाभाववत्वबाधविधायकत्वं व्युत्पत्तिरेवोदाहरणत्वमिति विशेषलक्षणमित्यर्थः। सम्यावेतिमाप्या
यम्या तय वलेवति सद्धेतौ तत्कलत्वमित्यर्थः। नेति तथा च पक्षं नप्रयोगस्य न पर्वं धाधी नस यत्र पक्षघटकत्वाभावेन तत्र हेतु
तेऽव्याप्तिरित्यर्थः। इत्येवेति एवकारेणैव पक्षे मेयत्वहानसत्ताहेतुना तद्धेतुपनावच्छेदेः नापीतिपर्वतो वह्निव्याप्यका
लोनादित्यादौ हेतावपवेदेः निव्याप्तिवारणपावि धूमो नेत्प्रहननहेतुनावच्छेदकावच्छिन्नपरं उपनायकत्वं वा धूमत्वेनाप्यव
प्रकृतगम्या अविवोधकत्वापाव यवत्वलहणे मित्यर्थः। दूषयति। उपनयेति अत्रेति जितासा ज्ञानकत्वं स्वरूपवाम्यपाताते न
जिज्ञासाहस्यलेनाव्याप्तिः। वास पदे न्यायपात व पदप टं उदाहसी तुवाक्ये णहेवेति। अन्वयप्रपव पदं प्रतिज्ञाप्यात्वव्युदाहरणा
त्वे तवव्याप्ति रेक्षुपनपदं प्रतिपव्याप्तिरेवपन पत्ते चो व्याप्तिरित्यर्थः। तस्मुखीसांविना पिसाध्यसाधनसामानाधिकरण्यप्रहस
भवाक्रियी सोपाहानेन सत आहा। अत्रेति। व्याप्तिचारवारणाय व्याप्तिपुरस्तान वारणाय अत्र पमर्थः। वीप्सितापदेनसकल
साधनाधिकरणोपस्थितौ तत्र साध्यग्रहजनकत्वाद्वाह्नि वीप्सा व्याप्तिवारणोंकाभावसंपादकापसद्धेतौ ट पदार्थेनमह

म.ता

५

नामत्वतद्व्याप्यत्वादिना सर्वोपसंहारवत्त्वमिति । ननु पक्षसाध्यस्यैकेवलान्वयित्वग्रहे प्रकारान्तरेणासाधने व्यभिचारित्वाभावग्रहे अथवा
दिति दृष्टान्तवीप्सोपादानं न कर्तव्यमनेनेत्यत आह अन्येति । अन्यमते तु इत्यनेन एवं तन्मात्रवृत्तित्वपर्याप्तधर्मो दिमत्वादेरेतद् दृष्टान्तभावव
त्वे तन्मात्रवृत्तित्वधर्मितावस्थानेनोपसंहारगमकत्वमेव व्यभिचारशङ्काभावात् तत्रवीप्साप्रयोजकत्वाशय । ननु सामानाधिक
रण्यमात्रे न व्याप्तिः । यद्यपि तु द्विविधव्यापकसाध्यसामानाधिकरण्यं तत्र प्रदर्शनं वक्तव्यं विना तत्कंपनेनादिति चेन्न तद्दृष्टान्तसह
चारस्य वीप्सया प्रदर्शनात् । व्यभिचारशंकाकाराप्रसहचारमात्रविषयकतादृशोदाहरणस्य व्याप्तिग्राहकत्वात् । ननु साध्यव्या
प्तिविषयकस्तात्पर्यानुपपत्त्या वाक्यार्थानुपपत्त्या वा उदाहरणप्रतिपादकत्वादिति चेत्तावता । ननु व्याप्यविशेषणेन धूमस्य व
धूमसम्बन्धस्य हेतुत्वे व्याप्यत्वाभावात् । एकधर्मिणि लघुधर्मस्फुरणे गुरुधर्मावच्छिन्नस्य व्याप्यत्वेन नानुमितिहेतोरित्याशयः ।
न च पक्षधर्मतातात्पर्यमनुपपत्त्यर्थकमिति वाच्यम् । उपनयेन पक्षधर्मताप्रतिपादनात् । अन्यथा कोऽपि विरहात् उपनयवैय
र्थ्यात् । ननु कथमनुवर्त्तनप्रयोगे ज्ञानेऽर्थाप्ति ज्ञाने कार्यपावतात् सम्बन्धहेतुत्ववोधनाय मनुपप्रयोगः स्फुटो । ननु पक्षधर्म
तालाभाय दृष्टान्तेऽकथं तद्रूपवत्त्वेनोपस्थानादिति चेन्न । उदाहरणोपनयनाभ्यामेव हेतुपरिच्छेदात् सम्बन्धस्य हेतुत्वे पक्षे धूम
इत्युदाहरणं धूमवान् व्याप्यमित्युपनयव्याख्यानेन स्यात् तर्किं तु पक्षे धूमवत्त्वमित्युदाहरणं धूमवत्त्वं व्याप्यमित्युपनयः स्या
दिति । सामान्यवत्त्वेतिनपा वस्तुसामीप्ये विभक्त्यर्थविरुद्धस्य सामान्यवत्त्वस्य पञ्चम्यर्थहेतुत्वविशेषणत्वेनान्वयासंभवान्नित्ति
तानन्वयत्वरूपतात्पर्यकत्वमित्यर्थः । तत्सप्तमीवलादृतेति । तथा च हेतुसमव्याप्त्या सामानाधिकरण्यमर्थः सामान्यवत्त्वसामानाधि रण्य

करणे विशिष्टप्रत्यक्षत्वरूपाविशिष्टहेतुत्वान्वयाद्विमतम्पर्वो वह्निप्रकारकस्पर्शनान्येऽपरविभज्य पर्वत्वाद्यनुमानत्वाद्धेतुः
पर्वबोधस्यावश्यकत्वं न दृश्यत इति नहीत्यादिना। प्रायप्यमानप्रपमाकोऽन्त्याविषयत्वादित्यपर्पः। केचित्तु प्रतीत्यव्याप्तिकस्यैव हेतोः
किं पक्षे वर्त्तते न वेत्याकांक्षायां दृष्टान्त इति वदन्ति। तत्र तादृशाकांक्षायां मानाभावात्। उक्तव्याप्तिपरामर्शव्याप्तिविशेषणतापा
पर्वो पक्षस्येति निनैपत्वे तृष्णा च प्रागुपक्षस्येतिक्रमेणैवाकांक्षानोचितत्वादित्याशयः। प्रदर्शितो चेति। यद्यपि उदाहरणेष्वनव्याप्ति
बोधकत्वं तस्याः पदार्थत्वात् तथापि तादृशहेतुसहचारप्रदर्शकत्वाद्दृष्टर्मी नसो बोधो भवतीति परं पदम्। तस्य व्याप्तिप्र
दर्शकत्वमिति भावः। अनुमितेरिति। अत्र तनेकानुमुहासीनवाक्यवाक्यं स्यापावयवपदार्थकं। व्याप्तेत्यादि। अवयवबोधरवा
हरणे पक्षत्वाभिमतापदं उदाहरणे भातेयह्येपर्तृष्णाच व्याप्त्याभिमतमुद्दिश्य तन्निरूपितावधेयपनिष्टव्यापकत्वाभिमतसं
वेधबोधकं व्याप्तितात्पर्यकेवानपेतिव्याप्त्यात्पर्यः। अन्यावयवेनैवं क्रमेणोद्देश्यविधेयभावक्रमेण बोधाजनकत्वात्त
तिप्रसंगः। पक्षतावच्छेदकहेतुमत्त्वलीयप्रातितापं व्याप्तित्वं त्वं केवलनितेन तन्मात्रभावपतितपदपदं व्याप्तिप्रकारकसाध्य
निरूपितावच्छेदकतयेन व्याप्तिसाधकप्रतिपत्तापां नातिप्रसंगः। केचित्तु व्याप्यत्वाभिमतवन्निष्ठव्यापकत्वाभिमतसंबंधवि
धेयकतयेव बोधनादित्याहुः। एतेति तात्पर्यं पूर्वोपक्षितबोधजनकत्वात् तत्तद्धर्मताहेतुतावच्छेदकविशिष्टव्यापका
त्वेपि अवयवत्वविशिष्टव्याप्तिप्रकारकतया तत्तवह्निव्याप्यप्रपवान् पर्वत इत्याकारकपरामर्शोत्पत्तौ बाधकाभावाद्व
तदुत्पत्तौ चानुमितित्वापत्त्या बलवत्वेनानुमितेरुत्पत्त्यादानादिहेतुतावच्छेदकरूपेण परामर्शएवानुमितिहेतुः नच

म. ना.

5

विगमनस्यपतादृशज्ञानेऽप्यपविशेषणविद्वह्निव्याप्तेर्न प्रकारिताकिंतु निरूपितत्वसंबंधेनाश्रयत्वमेव प्रकारः। उपनयस्य
वह्निव्याप्यधूमवदयमिति ज्ञाने तत्त्वस्य पूर्वोक्तदिशाऽऽश्रयत्वमेव निरूपितत्वसंबंधेनाश्रयत्वमेव प्रकारः। उपनयस्य व
ह्निव्याप्यधूमवदयमिति ज्ञाने तत्त्वस्य पूर्वोक्तदिशाऽऽश्रयत्वमेव निरूपितत्वसंबंधेनाश्रयत्वे प्रकारत्वादिति वाच्यं। एक
देशीत्वव्यापत्वान्तत्वस्य पार्थेऽप्यपत्वमेव तत्र व्याप्तेः प्रकारत्वात्। असति बाधके व्युत्पत्तिसंकोचस्यान्याय्यत्वात्। ननु
पक्षे ... रीत्या व्याख्यापि महावाक्यार्थज्ञानस्यैव उपनयार्थविषयकत्वेन परामर्शरूपतया तत एवानुमितिसंभवात् किं स
र्वोपसंहारवचनवादिवाक्यजन्यत्वेन प्रामाण्यशंकानिरासकत्वाभावात् नार्थसिद्धेः प्रभवतीति वाच्यं अप्रामाण्यसं
देहस्य मग्ना एव सा वैशिष्ट्यादिकत्वात् अनुमितिसामग्र्यावलवत्तेन प्रामाण्यसंदेहासंभवात् अन्यथा वादिवाक्यप्रयो
ज्यत्वेन परामर्शजनकव्याप्तामाण्यसंदेहसंभवेन तत्रोपनुमित्यसंभवादिति चेत् उपनयावान्तरवाक्यार्थज्ञानं तत्र महावा
क्यार्थज्ञाने स्वपक्षे व्याप्तिविशिष्टवैशिष्ट्यानवगाहि तथा तत्रोऽनुमित्यसंभवे तत्पक्षे व्याप्तिविशिष्टवैशिष्ट्यानवगाहि
परामर्शान्तरस्यावश्यकत्वात् तादृशपरामर्शस्यैवानुमितिहेतुत्वात् तत्र चावान्तरवाक्यार्थग्रहपूर्वकमेव महावाक्यार्थ
ज्ञानं तत्र तत्र न भवतीति वपरामर्शान्तरं। ग्रंथगौरवस्य फलविशेषाभिप्रायकः। न चैवं तत्रैव परामर्शप्रयोजकं शाब्दज्ञा
नजनकत्वाभावात् सापेक्षज्ञाने व्याप्तिरिति वाच्यं। तन्त्रावान्तरवाक्यार्थबोधमादाय वक्तृज्ञानसंभवात्। तत्रापि तादृ
शशाब्दबोधस्वरूपयोग्यतामात्रं। ... हेतुतावच्छेदकसंबंधेन पक्षे हेतुवगाहिज्ञानजनकतानातन्कतीव राम

साविशेषणत्वात्पंहोयो नवा कृत्स्नकोऽहोरेऽतिव्याप्तिरिति वाच्यं। तथापि पक्षीयांशत्वाकार्थज्ञाने विनैव महावाक्या
र्थबोधस्तत्रावयववाद्यायत्तिव्याप्तिः प्रत्येकस्य तथात्वेन प्रत्येकातिरिक्तसमुदायाभावात्तत्र संभवापत्तेः ध्वनिवाचस्तु
नकृत्वं न ज्ञानेनकतावच्छेदकतापर्याप्त्यधिकरणत्वं नातोऽवयववादावतिव्याप्तिरिति वाच्यं॥ ननु कतापात्स्वे
कपर्याप्तत्वेनायाः सत्त्वव्याप्तित्वात्। किं च जनकत्वं स्वरूपयोग्यत्वं फलोपधानं वा। नाद्यः उदासीनप्रतिज्ञादिसमाना
कारेऽतिव्याप्तेः। नान्त्यः पत्र महावाक्यार्थज्ञाने नताके तत्राव्याप्तेः। अपि चोदासीनन्यायप्रसमानाकारवाक्येऽपि वेऽतिव्या
धूमोपनतः धूमश्चाव वह्निमन्मात्रवृत्तिरास्ति न वह्निव्याप्यधूमेपर्वतेन वृत्तित्वेन तस्माद्वह्निः पर्वतवृत्तिरित्येवमादौ न्यायस
मानाविकारवाक्ये व्युत्क्रमावयवकदंबकेऽतिव्याप्तेः अव्याप्तिनामत्वात् पाठे न वह्निव्याप्यधूमवान्पर्वत इत्यामसवाक्ये
व्याप्तिव्याप्तेः ध्वनवादात्संता त्वादेवपरामर्शजनकमितिवाच्यं। अनु मितुत्वं तात्पर्यं स्थानजन्यताज्ञानमानससंतानस्वपंभवादित्यर्थे
वाननु न्यायजन्यज्ञानस्य कुतो लिंगपरामर्शोऽप्रयोजकत्वेन नत्वाप्तप्रतिज्ञादीनामेकवाक्यतया एकानुभवजनने योग्यतयावार्थ
विशिष्टज्ञानेनत्वार्थविषयक समूहालंबनरूपे महावाक्यार्थज्ञाने नेन च महावाक्यार्थज्ञाने न विशिष्टवैशिष्ट्यावगाहिमानांतरं
हेतुव्याप्तिविशिष्टवैशिष्ट्यावगाहिमानोत्तरं मनः उपयापनेत्स्वासरूपसहकारिसंपन्नेस्त्रीक्रियतेनैवचमनसाचरमपरामर्शोजन्य
तइतिसर्वेः। अयथाविशिष्टवैशिष्ट्यावगाहिमानांतरमितिमपस्येहेतुतावच्छेदक विशिष्टव्याप्तिवैशिष्ट्यावगाहित्वानांतरविशेषणता
तावच्छेदकप्रकारकविशेषणतात्वानुरूपमित्यर्थः। प्रतिज्ञापदेतैः पंचवाक्यजन्यमहावाक्यार्थज्ञानस्यैवनिगमनस्यानात्पदार्थविषय

म॰ना॰ ६

कृत्वेन हेतुतावच्छेदकविशिष्टव्याप्तिवैशिष्ट्यावगाहितया तत एव चरमपरामर्शत्वेन तत्प्रयोज्यहेतुतावच्छेदकविशिष्टवैशिष्ट्याव
गाहित्वात् तस्य चरमत्वात् न च तत्र हेतुस्वरूपवैशिष्ट्यपक्षधर्मतावगाहित्वस्य तदनन्तरमनुमितेः प्रतिबन्धकत्वाभावात् निर्दोषत्वं न च स्वरूपविशिष्टवह्निव्याप्तिमत्त्वज्ञाना
त् किं तु तादृशस्य संबन्धेन व्याप्यस्य प्रयोजकत्वे एव प्रकारः उपनयस्य वह्निव्याप्यधूमपदेन पर्वतप्रकृताप्रत्यक्षविषयतानुमितिजनकत्वे विकल्पः सिद्धसाधनं
शोधने हेतुव्याप्तिपक्षधर्मतानिरूपणे चेति न चेतरेतराश्रयः केचित्तु साध्यव्याप्यपक्षधर्मतावाधितत्वासत्प्रतिपक्षितत्वज्ञानं हेतुरिति वास्त
ए वेत्यपि इत्याहुः अनुमितिचरमत्वाभावादत्र उपनये तदवयवे च व्याप्तिवाक्ये ताद्रूप्यकारणतं नं परामर्शविशेषणं तद्वत्त्वे वा
वाधितत्वासत्प्रतिपक्षितत्वविषयकत्वे परामर्शत्वे च व्याप्तिपक्षधर्मतावगाहित्वं तथा कारवाधितत्वासत्प्रतिपक्षितत्वविषय
कव्याप्तिपक्षधर्मताज्ञानविषयकेत्यर्थः शाब्दज्ञानपदेन शाब्दत्वरूपजातिविशेषः नातोऽशाब्दत्वाज्ञानत्वयोरन्यतरत्वे पर्यवसितप्र
योजकत्वे चावाधितत्वांशे विवक्षितमन्यथा उपनयोत्तरचतुरवयवजन्यज्ञानस्यापि व्याप्त्यंशे तादृशज्ञानप्रयोजकतया
तदंशे ऽतिव्याप्तिः इतरस्यापि नवजनकत्वमपहाय कथं प्रयोजकत्वघटकेति वाच्यं जनकतावच्छेदकप्रयोजकत्वस्य लघु
त्वात् उपनयांशेऽतिव्याप्तिः तादृशावयवस्य वाक्यस्य वाधितत्वांशे जनकताविरहात् अवयवत्वस्य पञ्चम्यन्तानन्यत्वादि
त्वात् घंशे जनकत्वाभावात् दृष्टान्तवाक्यस्य प्रयोजकत्वं च दृष्टांशे पक्षीयत्वेनैव स्फुटीभवति व्याप्तिवाक्यपदं वाक्यत्वेन योगत्वव्याप्तिवा
रणायेति भावः एतत्प्रयोजनं तुः चापत्वाभावात् सद्दृष्टान्तेन कोऽन्तरगतज्ञानस्यापि योग्यतात्वाननुविधायकत्वात् न्यायमहावा
क्यत्वेन तादृशज्ञानप्रयोजकतया तत्र व्याप्तिः अवयवत्वं तदवयवत्वावयववाक्यत्ववाक्यत्वव्याप्तेः तेषामपि संग्रहार्थं तत्पदमन्या रत्न

नाविषयत्वमिति निःसंदेहादिहितिभावः। इदमुपलक्षणं। यथोक्तस्य वह्निमत्त्वस्य व्यभिचारत्वरूपत्वेपि यथोक्तरूपत्वमेव व्य
भिचारत्वस्यादृष्टयेष्टमभिचारावि शिष्टस्य तस्य व्यभिचारपदार्थत्वाभावान्न व्यभिचारपदस्य पारिभाषिकत्वापत्तेः। न
चैवं व्यभिचारत्वं संभवति कुतः तदनुपसंहारित्वे तथा हेतौ तत्त्वविरोधे तेनेति परास्तं विरुद्धे तत्तेनान्वयः। अनु
मितिविरोधीति। अनुमितिविरोधी यो धर्मः तस्य बंधव्याहतिः पक्षकदाचित् तत्त्वं वा व्यभिचारस्य तत्त्वेः। बाधितमानत्वमा
प्रत्यासत्तेः सत्प्रतिपक्षस्य महानसमहानसरूपानुमितिविरोधितो व्यभिचारस्य संबंधाभावाद्व्याप्तिवारणाय पक्षतावि
ति। अत्र साधारणत्वं तु साध्यवदन्यवृत्तित्वे सति साध्याभाववद्वृत्तित्वं न तु साध्यवत्तावन्निष्ठात्यन्ताभावप्रतियोगित्वे सति साध्याभावव
त्तावन्निष्ठात्यन्ताभावप्रतियोगित्वं तेन शब्दो नित्यः शब्दत्वादित्यत्र पक्षे साध्यतदभावान्यतरनिश्चयपक्षस्य पक्षविपक्षव्यभिचारत्वापत्तेः प
क्षातिरिक्तमात्रे साध्यतदभावनिश्चयदशायां तत्र सर्वपक्षविपक्षव्यावृत्तत्वरूपासाधारणत्वस्य व्यादिति निरस्तं। साध्य
तदभाववद्वृत्तित्वस्य कदाचिद्व्याप्त्याभावत्वात्तद्दूषो वह्निमान्धूमादित्यादौ स्वरूपासिद्धस्वरूपविरोधिधर्मो मेयत्वादिव्याप्ति
वारणाय वक्तृत्वमिति त्वसमीचीनं प्राग्भूतं प्रत्यानुपपत्तेः। नन्वन्यत्र व्यभिचारादिज्ञानस्येवानुमितिविरोधित्वेन व्यभिचारादे
रनुमितिविरोधित्वादसंभवः। न चाविरोधित्वे विरोधिज्ञानविषयत्वं तत्र पक्षादि वह्निमान् वह्निर्वह्निमान्धूमादित्यादौ व्यभि
चारादिज्ञान समविषयवह्निमेधूमत्वाद्याहार्यवह्निधूमादिरवतिव्याप्त्यापत्तेः। अत एवान व्यभिचारादिमत्त्वाविषयत्वं तत्र
मेयत्वादिमादाय व्यभिचारहेतुमात्रेः। अन्यथाप्यतेः। अत्र विरोधिज्ञानविषयत्वमिति तत्तज्ज्ञानं समानत्वे तद्विषयतानन्त्रा न

म.ना.

17

वरव्याप्तिवत्त्वाभाववद्वृत्तित्वप्रमेयत्वमिति भ्रमभिन्नत्वमनुमितिप्रतिबंधकतानवच्छेदकवह्न्यभावत्वप्रमेयत्वादिसाधारणमित्या
शिताद्यवस्थानिराकरणं। अनुपसंहारिप्रकृतानतमान्यत्रोद्देश्यस्वरूपप्रकृतानतसाध्यमात्रविधेयकप्रकृतहेतुमात्रलिंगकानुमितिप
ढं तत्पाचत्वमात्रपक्षकतन्मात्रसाध्यकतन्मात्रहेतुकानुमितिप्रतिबंधकभ्रमभिन्नतानवच्छिन्नो यो धर्मः पक्षतावच्छिन्नस
वधवान् स हेतुस्तस्मिन्पक्षे तस्मिन्साध्ये सव्यभिचारः इतिलक्षणार्थे पर्वतो वह्निमान्द्रव्यादित्यत्र तस्यावकोणत्वादिति चेन्नको
दृशज्ञानविषयधर्मवत्त्वस्य सव्यभिचाररूपत्वे तादृशज्ञानविषयधर्मत्वमेव सव्यभिचारविशिष्टस्य व्यभिचाररूपत्वा
त्वाभावेन सव्यभिचारपदस्य पारिभाषिकत्वापत्तेः। न च व्यभिचारत्वेन संभवति धूमवान् वह्नेरित्यत्र हेतौ धूमवद्वह्नित्वादेर्व्यभिचारप
दवाप्रत्येकपदार्थस्यापि व्यभिचारत्वापत्तेः। सव्यभिचारपदस्य पारिभाषिकत्वे दृष्टापत्तौ तादृशज्ञानविषयसहेतुस्त
स्मिन्पक्षे तस्मिन्साध्ये सव्यभिचार इत्यस्यैव सम्यक्त्वेन तादृशज्ञानविषयधर्मसंबंधवत्त्वपर्यन्तस्य व्यर्थत्वापत्तेरिति
न व्याप्त्या। अनुमितिविरोधिसंबंधोपस्थितिवह्न्यादौ प्रतियोगिताकतादृशविशिष्टस्य तत्तत्त्वरूपतादृशविशिष्टविशिष्टनिरूपितत्वेनेति
पति इदं विषयित्वं अनुमितिविरोधि अनुमितिविरोधितावच्छेदकं तादृशविशिष्टनिरूपितविषयत्वं तादृशभावे सति इदं तस्मि
न्पक्षे तस्मिन्साध्ये तस्मिन्नयं सव्यभिचारः अभेदसंबंधेन तादृशविशिष्टसंबंधेन हेतुः तस्मिन्पक्षे तस्मिन्साध्ये सव्यभि
चार इति व्यभिचारसव्यभिचारयोर्लक्षणे फलितं तत्पक्षकतत्साध्यकतद्धेतुकानुमितिरप्रसिद्धा तदेतत्स्वमेव। निर्वह्नि
वह्निमान्नित्यादिवत्स्यापेक्षतानवच्छेदकधर्मसंबंधेन तादृशविशिष्टसंबंधितानभिधाने विशिष्टसमन्वयापाद ताम

संबंधेन तादृशविशिष्टसंबंधित्वाभिधाने वाक्यभेदस्यत्वादिसाध्यव्याप्तिः तात्पर्यतस्तादृशविशिष्टसंबंधित्वाभिधाने वा
नं तत्संबंधिताप्रवेशात् । एवमग्रेऽपि विशिष्याभेदसंबंधेनेत्यंशस्य भेदेऽवगाहित्वं चैतादृशव्याप्त्यनुपगमात् कालीनत्वादिसंबंधेन ता
दृशविशिष्टसंबंधित्वमेव कुतो नोक्तमिति वाच्यं अभेदसंबंधमपेक्ष्य समानकालीनत्वादेर्गुरुत्वात् अत्र शोकुवनिके
न्यायाप्त्यां अवच्छेदकत्वे चानेकमिति रूपहानित्वे तेन साध्यप्रतियोगिकत्वे नाभावांजनत्वमाहुः नोपसंग्रहात्तदि प्रम
स्यापि प्रतिबंधकतया प्राप्ताभावावच्छिन्नहेतौ दिरूपविशिष्टविसंपकत्वस्वस्वरूपसंबंध धर्मपदं बंधकताव च्छेद
कत्वविरहे पिन तानिः । न वैवं प्रागभावको लीय दोषगंधवानपृथिवीत्वादित्यादौ धिनोस प्रसिपक्षिणे च यावत्स
त्वेनिपक्षमेव व्यापिनिव्याप्तिः । कांचनमयः पर्वतो वह्निमान् धूमादित्यादिपक्षविशिष्टसाध्यसिद्धः पर्वतः कांचनमय वह्नि
मान् वह्नेरित्यादिसाध्यविशेषणासिद्धः पर्वतो वह्निमान् कांचनमयधूमादित्यादिसाधनविशेषणासिद्धे चातिव्याप्तिः
कांचने धूमवान् वह्नेरित्यादिस्वरूपासिद्धसंग्रहकीर्तिसाधारणे चातिव्याप्तिः नत्र पक्षवृत्तित्वाभावोऽसत्त्वे दृष्टत्वाभा
वात् हेतौ चेन्नाप्रपक्षवृत्तित्वेस नीपस्य पक्षवृत्तित्वग्रहाविरोधित्वनतीतत्वे पक्षवृत्तित्वग्रहाविरोधित्वे च प
क्षतानवच्छेदकरूपेणापि हेतौ साध्यतावच्छेदकरूपेणसाध्यस्य हेतुतावच्छेदकरूपेण हेतोर्वाविपनसाने तत्र ति बं
धकतानवच्छेदकत्वं तद्यानुमितिविरोधितावच्छेदकस्य विशेषणांशाधारणपक्षानेचनसाध्यादनुमितिवि

म.ना. रोधित्वमपि तु अव्यभिचारो व्याप्तिग्रहप्रतिबन्धकत्वमेवेति मतेनेदं लक्षणमतोऽनेन गताव्याप्तिः व्याप्यत्वासिद्धिश्च
साधारणत्वं तर्गतेवव्वह्यमात्तासिद्धसाध्य लक्षणतानाङ्को तुतपत्त असिद्धाविरव्यभिचारःसामान्यलक्ष
18 णतानाङ्कान्तरपाव्यभिचारांतर्गतत्वेऽपि बाधकालावगताने चैवैमाये व्यभिचारः रिति विशिष्टस्य व्यभिचारस्य
हापित्वे नहूत्रं निरुक्तविशिष्टधर्मस्य सत्प्रतिपक्षरत्नु विरोधेऽतिव्याप्तेः तस्यापि व्यभिचारांतर्गतत्वे नैष्प
व्यभिचारानुपपत्तेः व्याप्यत्वासिद्धश्चव्याप्यत्वासिद्धत्वेन तदभिमतः अपि तु अव्याप्तिश्च साधारणासिद्धत्वे
नैवतिवाच्यं विरोधान्यत्वे तन्निरुक्तविशिष्टधर्मस्य विशेषणतोपत्वात् अविरोधान्यत्वं च हेतुसाध्यसामाना
धिकरण्यग्रहविरोधितानवच्छेदकत्वे अ साधारण्ये त्वं च तत्साध्यतद्भाववत्पक्षज्ञानात्मकप्रतियोगी
हेतुनां तस्याव्याप्तिः साध्यवद्वृत्तित्वे साध्याभाववद्वृत्तित्वं मूलसाधारणत्वमिति तिसाधारण्यापि कमतो
नैव साध्याभाववृत्तमानाक्षिक सत्पक्षरतृहि तितात तप्रतिबन्धकतावच्छेदकं सद्धेतुसाध्यसामानाधि
करण्यग्रहविरोधितावच्छेदकं तद्रूपत्वं निवेश्यावेतिनक्षण्यनुपपत्तिः व्यभिचारोदाहृता तन्मण्यनुमिति
प्रतिबन्धकमतेनेदं लक्षणं तद्धित्रिकत्वे साध्यनिष्ठविशेष्यत्वाभिमितिवावतननुपहः से दिग्ध
साध्यकः तद्धितिकत्वं कृषोवद्विमान् धूमादित्यादौ पक्षे केवलं सन्दिग्धसाध्यसंदेहे कृतानिश्चितमेव नम

मानाधिकरणा एव च साध्यतदभाववन्निरूपितत्वापि धूमस्यासाधारणतया तत्राव्याप्तेः। यद्यपि सर्वत्रैव साधनाधिकरणे साध्यवत्तानि-
रूपितत्वद् असाधारणतोऽव्याप्तिवारणाय साध्यवत्वप्रवेशः। सुरभिगोरश्वत्वादित्यादौ विरुद्धस्याश्वत्वादेर्वारणाय विशेष्यदलं। घटोऽश्व-
सत्वादित्यादौ साधारणस्याश्वत्वादेः संग्रहाय मात्रपदं पक्षातिरिक्तत्वं चापि साध्याभाववद्वृत्तित्वे सति अन्यथा अयमेरश्वत्वादित्या-
दावश्वत्वादावपि साधाधिकरणमात्रे साध्यतदभाववन्निरूपितदशायामसाधारणतया तत्राव्याप्तेः। वृत्तित्तु मूले तथैव पाठः पक्षा-
तिरिक्तत्वपक्षे: साध्याभाववन्निरूपिताविशेष्यः तदतिरिक्तत्वसाध्याभाववन्निरूपितविशेष्यत्वमिति यावत्। न तु संदिग्धसाध्यवत्तदति-
रिक्तत्वम्। सुरभिर्गौरश्वत्वादित्यादौ पदाकेवलसुरभीधेनुगोत्वसंदिग्धत्तदतिरिक्तेऽश्वत्वानधिकरणा एव च गोत्वतदभाववन्निरूपितत्वा-
र्थमश्वस्यासाधारणतया तत्राप्यव्याप्तेः। यद्यपि सर्वत्रैव साधनाधिकरणे साध्याभाववन्निरूपितत्वदसाधारणतोऽव्याप्तिवारणा-
य साध्याभाववत्वप्रवेश इति ध्येयं। अनुपसंहार्य इति तत्र जगतएव साध्यसंदेहाक्रान्ततया पक्षतातिरिक्तस्याप्रसिद्धेरिति भावः। इद-
मुपलक्षणं॥ द्रव्यसत्वादित्यादौ साधारणेऽपि साध्यतदभाववद्वृत्तिनिरूपितसत्वदशायामव्याप्तिरित्यपि बोध्यं। धूमात्तु वितिपर्व-
तो वह्निमान्धूमादित्यादावसाधारण्योन्नीर्तिजादशायां साध्यव्याप्यधूमादावतिव्याप्तेरित्यर्थः। पक्षएवेति एवकारोऽव्यर्थसा-
ध्यसंदेहविशेष्यत्वसाध्यवतीति पर्वत इति शेषः। इदमुपलक्षणम्। अयमश्वेगोरश्वत्वादित्यादावसाधारणतोन्नीर्तितादृशा-
यां विरुद्धेऽश्वत्वादावप्यतिव्याप्तिः तस्य साध्याभाववन्नासंदिग्धवत्वपि साध्याभाववत्स्य ग्राह्यो वृत्तेरिति बोध्यं॥ पक्षवृत्तित्वं इति अ-
नुमित्योपयिकोऽनुमितिजनकज्ञानविषयोयः संबन्धस्तद्वन्त्यत्वमित्यर्थः। सर्वसंबन्धः पक्षसत्वविपक्षासत्वं वा तत्र सपक्षसत्वाभा-

१

म॰ना॰ १९ 19

व्यमादायासाधारणलक्षणासमन्वयः सपक्षत्वं निश्चितसाध्यवत्त्वं न तु साध्यवत्त्वमात्रं पक्षस्य सशब्दो नित्यः शब्दत्वादित्यादिसद्धेतावपे
ऽसाधारण्योऽव्याप्त्यापत्तेः न च तल्लक्षणमेतत् तदसाधारणमेव न किं तु साध्यवद्वृत्तित्वस्यासाधारण्यः शब्दः शब्दत्वादित्यादिविर
द्धमेवासाधारणं तत्र च विपक्षासत्त्वाभावमादायैव लक्षणासमन्वयः तेन निरुक्तसपक्षत्वाभावस्य विरोधान्यत्वाभावेऽपि न
क्षतिरिति वाच्यं। तथा सति विरोधान्यत्वदलवैयर्थ्यापत्तेः साध्यवद्वृत्तित्वस्यासाधारणलक्षणेऽप्रवेशे आकाशाद्यवृत्तिहेतोरसा
धारण्येन लक्ष्यतयाऽव्याप्त्यापत्तेः केवलं निश्चितसाध्यवद्व्यावृत्तत्वरूपं सपक्षव्यावृत्तत्वमेवासाधारणत्वं तु विपक्षव्या
वृत्तिमपि तत्र घटकमित्येतन्मते एव तल्लक्षणातेन वह्निमान् धूमादित्यादौ धूमादेर्विपक्षव्यावृत्तत्वाभावदशायां सपक्षव्यावृत्त
त्वेऽप्यस्य लक्ष्यत्वात् तदानीं केवलसपक्षसत्त्वाभावमादायातिव्याप्तिरिति निरस्तं। साध्याभाववद्वृत्त्येति। स्वसमानाधिकरणा
न्योन्याभावप्रतियोगितावच्छेदकं साध्याभाववत्त्वमात्रं साध्याभाववद्वार्थस्वं न तु स्वसमानाधिकरणात्यन्ताभावप्रतियोगि
तावच्छेदकसाध्याभाववत्त्वं संयोगादिसाध्यकेऽव्याप्यादिवृत्त्यामाणां संगतेः। साध्यवृत्तिश्चेति साध्यवन्निष्ठाभावप्रतियो
गिप्रतियोगिधर्मस्तद्धार्थ्यत्वं तदवच्छिन्नान्योन्याभाववद्वृत्तित्वमर्थः। अत्र सत्त्वगोत्वान्यतमत्वादित्यादौ गोत्ववन्निष्ठाभावप्रतियो
गितानिरुक्तव्याप्यत्वमस्त्वेवादावन्वेऽपरत्विलक्षणासमन्वयः इति भावः। पूर्वोक्तदृष्टपक्षसत्त्वेऽप्यधिकं नाहदृशमिति संयोगा
दिव्याप्यत्वं गतिद्रव्यत्ववन्निष्ठाभावप्रतियोगिनः संयोगादव्याप्यवृत्तिगुणत्वादावित्यर्थः। साध्यवन्निष्ठत्वपदं साध्यवदितिरा
स्वावच्छिन्नवृत्तिमत्त्वविवक्षतेतदा तु नाऽपन्दोष इत्यवधेयं। साध्यासमानाधिकरणेति साध्यासमानाधिकरणत्वमात्रं साध्यानधिक १९

रणावृत्तित्वं अधिकरणभेदेन संयोगाद्यभावस्याभिन्नतया च संयोगादिसाध्यकसद्धेतौ नातिव्याप्तिः। ननु साध्याधिकरणावृत्तित्वं अधि
करणभेदेन संयोगाद्यभावस्याभिन्नतया च संयोगादिसाध्यकसद्धेतौ नातिव्याप्तिः। ननु साध्याधिकरणावृत्तित्वं तत्र अधिकरण
भेदेन संयोगाद्यभावस्य भिन्नत्वाभ्युपगमाद् एवं संयोगगुणत्वादित्यादाविव व्याप्तिविरहोऽपि साध्याभाववद्वृत्तिपर्य्यापन्नः साध्याधि
करणावृत्तित्वव्याप्यत्वस्यैव सम्यक्त्वात्। न चैवं साध्यपदवैयर्थ्यं साध्यानधिकरणावृत्तित्वमात्रव्याप्यत्वस्यैव विवक्षितत्वात् तत्त्वाद्भावविशि
ष्टाभावस्य घटकतया साध्यानधिकरणावृत्तित्वत्वादिव्याप्यत्वमादाय सद्धेतौ नातिप्रसङ्ग इति वाच्यं साध्यानधिकरणवृत्त्याकाशाघ
भाववद्व्याप्यत्वमादाय सद्धेतावतिप्रसङ्गात् प्रतियोगिसमानाधिकरणवत्साध्याधिकरणत्वलक्षणाविरुद्धधर्माध्यासाभावेनाकाशा
घभावस्याधिकरणभेदेन भेदाभावादिति भावः। अधिकरणभेदेनाभावभेदमानाभावादाह साध्यवदिति। अन्यथा अन्याभावस्याव्याप्य
वृत्तित्वाभावात् संयोगादिसाध्यकसद्धेतावव्याप्तिरिति भावः। न च अधिकरणभेदेनाभावभेदाभ्युपगमेऽपि प्रत्येकमपि प्रथम
लक्षणागमसङ्गतं द्रव्यत्वाभाववान् पृथिवीत्वादित्याद्यभावसाध्यकविरुद्धेऽतिव्याप्तेः। तत्र साध्यतावच्छेदकद्रव्यत्वावच्छिन्नप्रतियोगिताक
स्याभावस्याप्रसिद्धेः तादृशस्य द्रव्यत्वादेर्माधर्म्यादित्यत आह साध्याभाववत्त्वमिति। साध्यविरोधित्वमात्रमिति साध्यतावच्छेदका
वच्छिन्नप्रतियोगिताकत्वमात्रमित्यर्थः। प्रथमाप्यतेस्साध्यासमानाधिकरणपदवैयर्थ्यापत्तेः। साध्यविरोधिव्याप्यत्वस्यैव सम्य
क्त्वात्। अत्र पदद्भावव्यवच्छेदेन च साध्यप्रतियोगिकत्वमेव साध्याभाववव्यापकत्वमस्तु च तादृशसाध्यतावच्छेदकावच्छिन्नप्रतियो
गिताकत्वपर्यन्तमेवेति वाच्यम्। साध्याकाशाभावाद्यभावमादाय सद्धेतावतिप्रसङ्गापत्तेरिति ध्येयम्॥ अभावाभावस्येति साध्य

२

प्र० नो० २० 20

मूर्त्ताभावप्रतियोगिताकस्येत्यर्थः। अभावप्रतियोगिनिरूप्यत्वेनेति अभावात्मकप्रतियोगितानिरूप्यत्वविशिष्ट इत्यर्थः। वैशि
ष्ट्यस्य तत्तीपार्थत्वात् एतच्च स्वरूपकथनं वाधकत्वविनेति घाधाभावेत्यर्थः। अभावप्रतीते ईदृशत्वात् घाभावाभावे। भावत्वप्रकारकप्र
तीतेः प्रमात्वादिति भावः। स्वरूपत्वेनाप्रतीतेः प्रमाणास्या तत्र भावत्वस्याभावत्वाहृत्तधर्मविशेष्यत्वादित्यभिमानात्। ननु गौरव
मेव बाधकं किं चाभावत्वं नाभावव्यावृत्तो धर्मः किंतु अभावाभावसाधारणो। एवंच धर्मरूपत आह अत्र न्यूनेति गौरवतादृश्यत्वा
घभावाभावे। भावत्वप्रकारकप्रतीतेर्भ्रमत्वाभ्युपगमे। भावत्वस्याभावाभावसाधर्म्यविशेषत्वाभ्युपगमेवमर्थः। अत्वं तेति
तन्न दधिकूराधि शेषे तौवत डमपप्रतीतेः सम्भवादिति भावः। ध्वंसप्रागभावयोरधिकरणतास्वरूपत्वे इहेदानीमुत्पन्नो घटध्वंसेरहेदा
नीमुत्पन्नो घटप्रागभावरत्यादिप्रतीतेरसम्भवान्तद्दुनयपरित्यागः किंचिन्तु। ध्वंसप्रागभावयोरधिकरणतास्वरूपसे घटसत्वदशायाम
पि तदुभयप्रतीत्यापत्तिः। इधिनीमपि अधिकरणसत्वात् अतस्तदुभयपरित्यागः। नन्वेवं घटात्यन्ताभावादेरप्यधिकरणतास्वरूपत्वे
घटापसारणादशायामेव घटसत्वदशायामपि तत्प्रतीत्यापत्तिरितिवाच्यं। अत्यन्ताभावान्योन्याभावयोस्तस्य दुष्टत्वादिप्र
तियोगिकात्यन्ताभावतद्वद्भिन्नप्रतियोगिकान्योन्याभावपरत्वादित्याहुः। विरोधिज्ञानेदृशायामिह तु विरोधितानद
शायां साध्यज्ञानसत्वे हेतुत्वसिद्धेर्हेतुत्वसिद्धज्ञानाभावतद्वत्ताज्ञानसत्वेनादिरुद्धधर्मवत्ताज्ञानासम्भवादित्यभिमानः। हेतुसत्वे हेतुम
त्ताज्ञानसत्वे साध्याभावासिद्धिरेवानुमितौ वाधः तथाच निरुक्तविरोधिज्ञानस्य पृथक्दोषत्वे नेति भावः। ननु तद्धेतुकविशिष्टराम
र्शे तद्धेतुत्वजन्यतानमेवप्रतिबंधकं ननु तद्धेत्वभाववत्तानामिव्याप्तिमात्मनाशकं तानवेति प्रमाणान्तरेण प्रमाणान्तरेणैव वाध २०

तद्धेतुमानिति बाधः। विरोधिगोचरबाधज्ञानस्य प्रतिबध्यप्रतिबंधकभावे हेतुविशेषजन्यत्वानुमितित्वविशेष्याणां गौरवापत्ति
रित्यत्र प्रयोजकत्वादित्यर्थः। हेतौ। इति पंचमी हेतुविशिष्टेत्यर्थः साध्याभावोपस्थापन इति पाठः विरोधस्यैव तत्प्रयोजकत्वे सति अनुमितौ उपजी
व्यत्वेनावनन्तरं योऽस्य। तथा च पक्षे निरुक्तविरोधविशिष्टहेतुमत्ताज्ञानं बाधनिरासः। पक्षसामग्री द्विविधा अनुमिति प्रतिबंध
कत्वं च विशिष्टबुद्धौ बाधनिर्णयस्य प्रतिबंधकतावच्छेदकत्वे सामग्र्या अपि तत्त्वप्रतिबंधकत्वे मानाभाव इति वाच्यं। बाधनि
श्चयोत्तरक्षणे विशिष्टबुद्धिवारणायैव तत्सामग्र्या अपि प्रतिबंधकतावच्छेदकत्वात्। ज्ञानरूपप्रतिबंधकाभावस्य केव
लपूर्ववर्तितया हेतुत्वात् अन्यथा सिसाधयिषाविरहानुमितिः स्यादिति भावः। क्वचित् साध्याभावस्य पक्षे प
न पीति। पाठः। तत्र पक्षे साध्यव्याप्यहेतुमत्तापरामर्शरूपः सत्प्रतिपक्षो वर्तते साध्याभावव्याप्यवत्त्वरूपविरोधिविशिष्ट
हेतुमत्ताज्ञानं च पक्षे वर्तते तत्र तद्धेतुना पक्षे साध्याभावज्ञानविरहेऽपीत्यर्थः। उपजीव्यत्वेन तस्य साध्यानुमित्य
नुत्पादे तस्य उपजीव्यत्वेनेत्यर्थः इति ध्येयं। तत्र पक्षे हेतुपति। ननु इति साध्याभाववत्संबंधः साध्याभावसमानाधिकर
णो हेतुः साध्याभाववत्संबंधापत्तेरिति व्युत्पत्तेः दोषः दोषपदं वाच्यः। तन्निपततत्प्रयमर्पणे साध्यासमानाधिकरणो हेतु
:साध्याभावस्य संबंधापत्तेरिति व्युत्पत्तेः दोषः दोषपदवाच्यः। तन्निपततत्प्रयमर्पणे साध्यासमानाधिकरणत्वे सति साध्या
भावसामानाधिकरण्यरूपतन्निपतत्वात् प्रायपीत्यर्थः तस्य निपततत्पत्तेरिति व्युत्पत्तेः। गौरवादिति गौरवेणातत्र व्याप्तिज्ञा
नस्यानुमितेर्वा प्रतिबंधकतावच्छेदकत्वविरहादित्यर्थः। ननु स्वरूपसंबंधरूपावच्छेदकतापर्याप्त्यधिकरणत्वं तदा

३

म.ना. षघटकत्वं अपितु अनतिरिक्तवृत्तित्वरूपतद्देवताच घटकं तच्च गुणादावपि संभवतीत्यत आह । असाधकत्वस्येति दोष
२१ ः। वैयर्थ्यादिति। साध्यासहचरितत्वदलवैयर्थ्यादित्यर्थः। तथा च साधकतासाधकत्वस्य दोषत्वव्यापकतया तदभावा
त तस्य दोषत्वसंभवः। अत एव पक्षे केवलसामान्यलक्षणायामपि केवलं न दोषपदप्रवृत्तिनिमित्तमपि तु असाधकत्वं साधक
२१ त्वविशेषितामिति भावः। ननु केवलमसाधकतासाधकतावान् दोषत्वव्यापकमपि तु साधकतासाधकत्वाभावविशेषण
व्यापकत्वान्यतरान्यतरवत्तत्त्वं तच्च वर्त्तते एवेत्यत आह । न चेति साध्यासहचरितत्वे सति साध्यासहचरितस्य गमकत्वम
मरूपापादमिति गमकताप्रयोजकरूपस्य व्याप्तेरभावरूपापादमित्यर्थः। न चार्थविशेषणतानासाधकतासाधनेऽप्यभिचा
रादिविशिष्टान्तरघटितत्वात् न दोषत्वसंभव इत्यवनतत्व। विपक्षवृत्तित्वं न विशेषणमिति तादृशस्यैव येन विपक्षवृत्तित्वे तमा
न पक्षे। नैकान्तिक इति नानैकान्तिकसामान्यलक्षणमित्यर्थः। असाधारणेति व्याप्यसंकीर्णासाधारणनामव्याप्तेरित्य
र्थः। सपक्षवृत्तित्वसहितमिति विपक्षवृत्तित्वे सति सपक्षवृत्तित्वविशिष्टं साधनमित्यर्थः। तथा चानैकान्तिकसामान्यल
क्षणासाधारणलक्षणतया साध्याभावसमानाधिकरणत्वे तु रेवाविरोधो वाच्यः न तु साध्यवद्वृत्तित्वांशोऽपि निवेशनी
य इति भावः। अधिकस्य सपक्षवृत्तित्वांशस्य व्यर्थत्वादिति दूषकतापामनुपयोगित्वादित्यर्थः। नन्वनेन दूषकताप्रयोज
करूपमपि तु असाधारणव्यवहारेऽपीत्यर्थः। तदुक्तभावात् तद्विरुद्धस्य तद्भावात् ततश्च विपक्षगामित्वमादाय साधारणव्यवहारम
हारस्य विरुद्धेऽपि सत्त्वात् नेदं साधारणव्यवहारविषयतावच्छेदकमपीति भावः। ननु साधारणविरुद्धव्यवहारो चोक्तः। अन्य २१

यात्साधारणासव्यभिचारविभाजकतावच्छेदकमेवखुर्वचमिप्रायेणाशंकते॥ अन्येति। नहि यत्कृतावंजनविरुद्धसाधारणा
त्वस्यातीनासंभवः। अनुमितिप्रतिबंधकपदोक्तानुमितिकारणीभूतव्याप्तिज्ञानपरं विरोधितापदेन च पक्षत्व वह्न्यभाववद्वृ
त्तीतिसमूहालंबनज्ञानप्रतिबंधकतावच्छेदकवह्न्यभाववद्भावववद्वृत्तित्वे प्रमेयत्वमादाय धूमादानातिव्याप्तिरिति
मतेपः। साधारण्यादिचतुष्टयासंगमयति सपक्षेति सपक्षात्साध्याधिकरणाद्विपक्षाद्भिन्नत्वे तद्वृत्तित्वतद्वृत्तित्ववि
शिष्टहेतुविषयकत्वसाध्यवद्वृत्तित्वसाध्याभाववद्वृत्तित्वविशिष्टहेतुविषयकत्वमितिपर्यवसितार्थस्तन
संगच्छते विरुद्धस्यानेनरूपेणासव्यभिचारत्वस्य त्विमर्थासंगतेः। उभयव्यावृत्तत्वपावतसपक्षविपक्षव्यावृ
त्तहेतुविषयकत्वसाध्यतदभावोभयव्यापकीभूताभावप्रतियोगिहेतुविषयकत्वमितिपावृता। अनुप
संहारित्वमिति अनुपसंहारित्वविशिष्टहेतुविषयकत्वंचेत्यर्थः। अनुमितिविरोधि अनुमितिविरोधितावच्छेदकतत
संबंधमिति तेषां साध्याभिन्नवृत्तित्वविशिष्टहेत्वादीनामभेदलक्षणसंबंधः प्रत्येकमस्तीति। प्रत्येकं साधारणासाधार
णानुपसंहारिणां चास्तीत्यर्थः। न चैवं साध्यवदभिन्नवृत्तित्वविशिष्टहेतोरभेदलक्षणसंबंधस्य विरुद्धेपि सत्वादतिव्या
प्तिरित्यत आह विरुद्धेपीति। अनेनरूपेण साध्यवद्भिन्नवृत्तित्वविशिष्टहेतुमत्त्वरूपेण। अन्ये त्वधिकरणस्य पर्याय
विधानपुनरुक्तेनयाहृत्तिहेतुरूपस्य विरुद्धस्य असाधारणपक्षकतदभिधानमितिवाच्यं। तत्रापि पर्यायोक्तसाधारण
त्वस्य सत्वेन सव्यभिचारांतर्गतत्वादित्यत आह उपाधेरिति विभाजकोपाधेरित्यर्थः। नं सकरः नाभेदः तथाचोवतत्रकस्य

म.वा. २२ तिव्याप्त्याहेतुकस्यैव विरुद्धस्य विभिन्नधर्मरूपेणाविभजनानयोर्न रुत्यमिति भावः। एतदनेन सूचितम्। एतत्त्वद्संतो वा शब्दोऽप्य
र्थे तथा चेतस्मात् तानदशायामपि अवश्यकसाधारणत्वादि प्रत्येकधर्मप्रकारकज्ञानस्यैव प्रतिबंधकत्वादित्यर्थः। व्य
र्थविशेषणत्वादिति सत्वं तद्विशेषणस्य व्यर्थत्वादित्यर्थः। विरुद्धसाधारणयोर्लक्षणे तु दूषयित्वा विरुद्धव्याप्तिवृत्त
लक्षणं दूषयति अत एवेति। अत्र लक्षणे द्वितीयहेतौ वह्निमान् धूमादित्यादौ साध्यव्याप्यस्य धूमादेर्वा
रणाय सत्यन्तं विरुद्धवारणाय प्रथमे साध्याभावाव्याप्येति स्थितिपसाध्याभाववन्मात्रवृत्तित्वस्य विशिष्टस्याति
विरोध सद्धेतौ साधारणानुपसंहारिणोर्न लक्षणो किं तु शब्दो नित्यः शब्दात् शशाण्यतरत्वात् सर्वं नित्यं प्रमे
यत्वादित्यादि साधारणासद्धेतावतिव्याप्तिवारणाय वह्निमानाकाशादित्यादाववृत्त्याकाशादेर्वारणाय हेत्वाभावत्वमि
ति। अवृत्तिश्च न हेत्वाभासः हेतुतावच्छेदकसंबंधेन वृत्तिमत एव तथात्वादित्यभिमानः। एतच्चाद्वितीयलक्षणे तु व्याप्यानुषंज
नीयं प्रथमलक्षणे साध्याव्याप्यत्वं साध्याभाववद्वृत्तित्वे सति साध्यवद्वृत्तित्वं साध्यवद्वृत्तित्वे सति साध्याभाव
वदवृत्तित्वं च साध्याभावव्याप्यत्वं साध्याभाववन्मात्रवृत्तित्वं साध्याभाववदवृत्तित्वे सति साध्याभाववद्वृत्तित्वं च सा
ध्याभाववन्मात्रवृत्तित्वस्य तेनानादरमिति भावः। व्यर्थविशेष्यत्वादिति हेत्वाभासत्वस्य लक्षणस्य व्यर्थत्वादित्यर्थः। तदुपाद
नेऽप्यवृत्तिदुष्टो दुर्वारत्वात् तत्स्वरूपासिद्धिमादाय तत्स्यापि हेत्वाभासत्वात् तानेहेतुदुष्टेति सामान्यलक्षणे स्वरूपासा
सिद्धिलक्षणे वा वृत्तिमत्त्वमपि विशेषणतां गौरवाद्युक्तत्वाद्वृत्तिभावः। एतत्पक्षलक्षणे द्विरुक्तवारणाय प्रथमलक्षणे २३

साध्याभाववद्व्याप्यत्वदलं द्वितीये साध्याभाववन्मात्रवृत्त्यन्यत्वदलं त्वव्यर्थं विरुद्धस्य सव्यभिचाराभिन्नत्वे प्रमाणाभावा
दिति विवेच्य प्रथममिति साधारणादेः प्रत्येकस्य ज्ञानविनेत्यर्थः। तत्ज्ञाने चैतस्यैव प्रतिवंधकतया पक्षे धर्मि
प्रकारकज्ञानस्यानुमितेः तत्कारणज्ञानस्य प्रतिवंधकत्वे मानाभावात्। न च साध्याव्याप्यत्वादिघटिततत्पायथोक्त
धर्मप्रकारकज्ञानमपि व्याप्तिज्ञानप्रतिवंधकमिति वाच्यं साध्यव्याप्यत्वादेर्हेतुतावच्छेदकविशिष्टहेतावप्रकार
त्वादिति भावः। इदमुपलक्षणं। साध्याव्याप्यत्वसाध्यवन्मात्रवृत्तित्वादेर्हेतुतावच्छेदकसंवंधेनैवावश्यं चैकव्यतया
सघटितज्ञानादित्यादौ पत्र हेतुतावच्छेदकविषयतादिसंवंधेन साध्यव्याप्यत्वादिकमस्ति हेतुव्याप्यव्यापकमि
मिति तु विवेच्य कस्य हृषणामादृगगनमिति। वाधाविरुद्धसंकीर्णेति। वाधविरुद्धभिन्नत्वेत्यर्थः। अत एव गतस
हचारित्वे सति साध्याभावसहचारितत्वस्य विरोधत्वं न चोक्तपमेतद्भिन्नः प्रमेयत्वात्। वेत शब्दोऽनित्यः शब्दाकू
शान्यतरत्वात् इत्यादेरपि विरुद्धतया तत्कारणाय वाधविरुद्धे तु न कू वाधविरुद्धत्वं च साध्याभावव्याप्यत्वरूपविरो
धाव्याप्यत्वकूत्विद्विप्य स्वरसोऽभावंनतद्दीजं तु संकीर्णसाधारणाविरुद्धसंकीर्णसाधारणस्यापि। अत्रालक्ष्य
त्वान्नव्याप्तिर्न दोषायेत्यवसेयं। अनयोर्लक्षणयोः परिष्कारप्रकारो धितावनुसंधेयः। सपक्षविपक्षगतेति। साध्यव
द्वृत्तित्वे सति साध्याभाववद्वृत्तित्वमित्यर्थः। सर्वपक्षेति। साध्यवन्निर्णीयविषयवृत्तिसामान्यभिन्नत्वे सति साध्या
भाववन्निर्णीयविषयवृत्तिसामान्यभिन्नत्वमित्यर्थः। सर्वपदसामान्यभिन्नत्वे सति साध्याभाववन्निर्णीयविषय

५

मु० का० २५ वृत्तिसामान्यभिन्नत्वेत्यर्थः। सार्वपदं सामान्याभावलाभाय यथाश्रुते एकमात्रसपक्षापक्षके ऽसाधारणे ऽव्याप्तेः व्यर्थे
ति। विरुद्धबाधकयोः सपक्षगतत्वविपक्षव्यावृत्तत्वदलयोर्व्यर्थत्वादित्यर्थः। तदुभयदलस्य हेत्वाभासानामनुपयो
गित्वेनासाधारणत्वात् साधारणाव्याघटकतया विरुद्धतया विरुद्धस्यापि साधारणासाधारणान्तर्गतत्वेन सव्यभिचा
रत्वादिति भावः। द्वितीये सपक्षगतत्वदलविपक्षव्यावृत्तत्वदलयोर्व्यर्थत्वादित्यर्थः। इत्याहुः। तदसत् अखण्डाभावस्य
हेतुत्वात्। अनुपसंहार्यपीति। पर्वतो धूमवान् वह्नेरित्यादौ साधारणे साध्यतदभावानिरूपासत्त्ववद्दशायामव्याप्तेरि
त्यर्थः। तदानीं साध्यतदभाववद्वृत्तिपानिरूपितस्याप्रसिद्धत्वात् तद्घटितत्वस्याप्रसिद्धेरिति भावः। न च सपक्षविपक्षव्या
वृत्तेत्यत्र सपक्षविपक्षत्वेन साध्यतदभाववन्निरूपितत्वं विं तु पक्षातिरिक्ते साध्यतदभाववत्त्वप्रवृत्तत्वं च सन्दिग्धसा
ध्यकत्वं तथा च पर्वतो धूमवान् वह्नेरित्यादौ साध्यतदभाववन्निरूपासत्त्वदशायामपि नाप्रसिद्धिः। पक्षा
साध्यवत्त्वमेव पक्षत्वं साध्याभाववत्त्वमेव विपक्षत्वमित्यत आह। विपक्षातिरिक्ते इति। अन्यथा एवं किं चेति। क्वचि
त्पाठः। सचनसन्दर्भः स्फुटः। प्रमेयत्वेनेति। अभेदेन तत्तोपासाधने साधके। एवमेतद्भिन्नः प्रमेयत्वादित्यभेदसा
धके प्रमेये पररूपे साधारणी इत्यर्थः। अनुपसंहार्ये ऽतिव्याप्तिमेव विवृणोति। पक्षातिरिक्ते तेति। जगतः एव साध्य
सन्देहाज्ञाततत्पात् तद्धातिरिक्ताप्रसिद्धेरिति भावः। द्वितीयं दूषयति। साध्यवतः सपक्षा इति तदभाववतश्च विपक्षत्वे राम
त्वहानिशेषः। अप्रसिद्धेरिति। शब्दो ऽनित्यः शब्दत्वादित्यादावसाधारणपदशायामव्याप्तिरित्यर्थः। अथधर्मस्य २५

२५

क्तनः साध्यवद्विपक्षान्यतरेति। साध्यवत्तदभाववदन्यतरेत्यर्थः। पक्षातिरिक्तेत्यापि यदि जलह्रदो वह्निमान् धू
मादित्यादौ साध्यव्याप्यस्य धूमादेर्वारणाय सत्त्वं तत घटोऽद्रव्यं सत्त्वादित्यादौ साधारणस्य सत्त्वादेस्संग्रहाय पक्षमा
त्र पक्षे पर्वतो वह्निमान् धूमादित्यादौ धूमादेरपि व्याप्त्यनधिकरणमात्रे साध्यतदभाववन्निष्ठपदशायामसाधार
णतया तत्रातिव्याप्तिवारणाय यतिरिक्तत्वं साध्यवद्विशेषणं तदर्थश्च पक्षः साध्यनिर्णयविशेष्यः उक्तावीजं
न विरुद्धसाधारणादुष्टविभाजकतावच्छेदकमिति यावत् असाधारणेति व्याप्यसंकीर्णसाधारणाद्यव्याप्ते
रित्यर्थः। तत्र व्याप्यसंकीर्णसाधारणादौ वीजं विभाजकतावच्छेदकं हेत्वाभासादिकेति। हेत्वाभासविभाजकतावच्छे
दकाधिक्ये इत्यर्थः। साधारणे साधारणमात्रस्य विरुद्धत्वा प्रवेशः विरुद्धमध्ये प्रवेशः तथा च साध्याभावसमानाधिकरणो
हेतावेव विरुद्धत्वे द्रव्यं सत्त्वादित्यादिसाधारणमात्रे विरुद्धव्यवहारापत्तेरिति भावः। विरुद्धलक्षणा इति विरुद्धस्येतरे
भेदानुमानमित्यर्थः। न व्यर्थत्वमिति। साध्याभावघटकस्य साध्यसहचरितत्वदलस्य न व्यर्थत्वमित्यर्थः साधारण
स्य साध्यसमानाधिकरणसाधारणस्यासाधकतानुमितिविरोधित्वमानाभावव्यर्थतासाधकत्वविघटकी केति शेषः। ए
तस्यापीति केवलसाध्याभावसमानाधिकरणत्ववत् साध्यासहचरितत्वे सतिसाध्याभावसहचरितत्वरूपसाध्याभा
वव्याप्यत्वस्यासाधकताव्याप्यत्वादित्यर्थः। व्यर्थविशेषणस्य व्याप्तिघटकत्वादिति भावः। ननु वह्निमान् नीलधूमादि
त्यादावपि व्यर्थविशेषणतादोषो न स्यादित्यत्रेष्टापत्तिमाह नीलेति नन्वेवं कथं प्राचीनैस्तदुक्तं हेतोर्व्यर्थविशेषणत्वमि

म.ना.
२५
25

साधारणादेर्वीजं विभाजकतावच्छेदकं हेत्वाभासादिकेति। हेत्वाभासविभाजकतावच्छेदकाधिकेत्यर्थः। साधारणो साधा
ध्याभावस्य विरुद्धत्वाप्रवेशः विरुद्धमध्ये प्रवेशः तथा च साध्याभावसमानाधिकरणो हेतावेव विरुद्धत्वेऽव्यसत्वा
दित्यादिसाधारणेनापि विरुद्धव्यवहारापत्तेरिति भावः। विरुद्धत्वहानाः इति विरुद्धस्येतरभेदानुमान इत्यर्थः। नव्यर्थ
त्वमिति। साध्याभावघटकस्य साध्यसहचरितत्वहेतुत्वस्य न व्यर्थनिग्रहस्थानत्वस्यादित्यत आह परस्येति कथायां परस्यो
क्तसाधारणस्येत्यर्थः। अधिकं अधिकनिग्रहस्थानान्तर्गतं। नन्वेवं विरुद्धत्वेऽसाधकतासाधनेऽप्यधिकेन निग्रहस्थाना
पत्तिरित्यत आह न चेति। अर्थौहीति। अर्थसाध्याभावव्याप्यत्वरूपो विरुद्धत्वशब्दस्यार्थः। लिंगं लिंगत्वेनाभिमतं व्याप्यत्वे
नाभिमतमिति यावत्। अर्थगत्येति। विरुद्धशब्दार्थसाध्याभावव्याप्यत्वे व्यर्थविशेषणत्वेऽपीत्यर्थः। उद्भावनेति। विरुद्धश
ब्दस्यार्थविवचनात्प्राक् व्यर्थत्वस्योद्भावनाशक्यत्वमित्यर्थः। एतत्पूर्वं तदुद्भावनेवादिना विरुद्धत्वशब्दस्यार्थान्तरकरणा
निबंधपोत्यानुपेणानुपपत्तेरिति भावः। आवश्यकतद्विवेचन इति अर्थविवेचनस्यावश्यकतयेत्यर्थः। तदुत्तरमेवेति
शेषः। व्यर्थत्वमधिकमिति प्रागुक्तदूषपतिहेत्विति। अवधारणार्थकचकाराद्यर्थतावच्छेदकः अधिकंत्वधिकाख्यनि
ग्रहस्थानं कृतं कर्त्तव्यते पतिहेत्वभिधानप्रयोजकाकांक्षाविषयपसिद्धरूपहीती पहेता कर्त्तव्यस्यप्रथमेनेवहेतुत्वस्य
र्थः। विशिषवृत्तेत्यमिति हेत्वभिधानप्रयोजकाकांक्षाविषयपसिद्धरूपविलहंतावृत्तेत्यमित्यर्थः। तथाऽनुपन्यासादिति राम
भागेनप्रथमं धूमज्ञानज्ञाप्योवह्निरित्यन्वयबोधाजननादित्यर्थः। अन्यथा धूमादिभागेनप्रथमं तादृशबोधजननेनीला २५

नन्वेति धूमेन समं नीलस्यानन्वयापत्तेरित्यर्थः। धूमपदस्य ज्ञानिनान्वयबोधकत्वेन निराकांक्षत्वादिति तत्त्वाभावः। अन्ये तु तथानुप-
न्यासादिति केवलधूमहेतुत्वस्य प्रतिज्ञार्थान्वयार तात्पर्यग्राहकनीलधूमवत्त्वादित्यस्यानुपन्यासादित्यर्थः। अन्यथे-
ति। व तात्पर्यतो व तस्योपन्यास इत्यर्थः। इत्याहुः। साध्यानुगतेति। साध्याभावव्याप्यस्येव विरुद्धत्वे सपक्षासत्त्वादिति
निश्चितसाध्यवद्वृत्तित्वादित्यर्थः। निश्चितसाध्यवद्वृत्तित्वे सति साध्याभाववद्वृत्तेर्वरवासाधारणत्वादिति भावः। साधार-
णाति व्याप्तेरिति इष्टसत्त्वादि साधारणातिव्याप्तेरित्यर्थः। विपक्षगामित्वमिति। दूषकतावच्छेदकं साधारणपक्षयोदोषः द-
दूषघटितत्त्वपानविशिष्टोदोष इति भावः। ननु यदि तादृशविशिष्टो न विरोधः तदा तदाश्रयस्य हेतोः कुत्रान्तर्भावः। अत्राहुरत ए-
वेति। व्यभिचारात साध्याभावसहचरितव्यतिरेकी अनवगतसाध्यसहचारकसाध्याभावसाधकत्वमिति साध्याभाववत्ताप्रतीतिवि-
षयवृत्तित्वमित्यर्थः। एतच्चैव ह्रदादौ साध्ये धूमादावपिगतमत आहृतत्र मा पक्षत्वं चेति। साध्याभाववत्ताप्रमाविषयवृत्तित-
मित्यर्थः। साध्याभावसंबंधेति हितो साध्याभावसामानाधिकरण्येत्यर्थः। तद्ज्ञानादिति। तद्ज्ञानस्य व्याप्तिज्ञानप्रतिबंधकत्वाभावा-
दित्यर्थः तथा च हेत्वाभासामान्यलक्षणानाक्रान्ततया नास्य हेत्वाभासोपाधित्वमिति भावः। पूर्वोक्तान्योन्याभावगर्भलक्षणमवि-
दूषयति। नापीति पूर्वोक्तमिति शेषः। तेनापौनरुक्त्यमवधेयं। इति साध्यवद्वृत्तित्वे सति साध्यवद्भिन्नवृत्तित्वस्य साध्यवदन्यत्वव्या-
प्यत्वरूपतया संत्यतद्ल्वैयर्थ्यादित्यर्थः। स्वव्यापकेति। स्वं साधनत्वेनाभिमतं तद्व्यापकत्वं तद्वत्सपक्षस्यानाधिकरणपघटितमि-
त्यभिप्रायेणाह दूषयति। ध्यवद्वृत्तित्वज्ञानोत्पत्तेः साध्याभाववद्वृत्तित्वज्ञानोत्पत्तिव्याप्यत्वादिति यावत्। एकविशेषवाधग्राहकसा-

प.ना.
२६
26

मयीसहकृतसामान्यग्रहसामग्र्यास्तद्दितरविशेषप्रकारकज्ञानजनकत्वमिति भावः। यद्यपि हृत्त्रिमत्वे सति साध्यवद्वृत्तित्व
ज्ञानस्य साध्याभाववद्वृत्तित्वविषयत्वावश्यकत्वेपि प्रकृते। न क्वापि नवृत्तिः प्रतिबध्यतावच्छेदकत्वमेदाहकेनापि त्र परस्य न्या
याप्तिद्द्वं संभवात्तथापि तदुपेक्षस्फुटतर मन्यसमाधानमाह उपजीव्यत्वेनेति। वृत्तिमत्वे सति साध्यवद्वृत्तित्वज्ञानस्येतर
वाघनिर्णयविधया साध्याभाववद्वृत्तित्वज्ञाने कुत्रचिदुपजीव्यत्वमात्रेणोक्तोर्थः। मात्रपदेनत्स्यतदात्मकत्वव्यवच्छेदः। भिन्न
त्वादिति कुत्रचित्त्वन्तद्भिन्नत्वस्यापि सत्वादित्यर्थः। साध्याभावानुपस्थितिविरहेणानेनाविनापि कुत्रचित्तदुपादानादितिभावः। उ
पजीव्यत्वेपि तस्य तदात्मकत्वे नियमाभावेपीति यावता न सत्प्रतिपक्षकृमिति नानुमितितत्कारणान्यतरसाहाय्यतिवध्रूकृमि
त्यर्थः। नन्विति अयापार्थकत्व अयापार्थकत्वमेवदूष्यमिति शेषः। यतः शब्ददोषस्य पुरुषस्फूर्तिकृतयातस्मिन्नसति हेत्वाभासाद्भाव
नंनिरनुयोज्यनुयोपित्वगय त्वमाहृतातीतिभावः। ननु तु जोऽपार्थकत्वमित्यत आह अयोग्यत्वेति। एकपदार्थे परपदार्थाभा
वप्रमायाः अयोग्यतात्वेन प्रकृतमाध्यसाधनसामानाधिकरण्याभावप्रमायोग्यता तस्याज्ञानेनेत्यर्थः। निश्चितेति। निश्चिता
योग्यताकत्वादित्यर्थः। तथाचनिश्चितायोग्यताकत्वेनापार्थकत्वप्रत्येतव्यपावगतिः। तदेवापार्थकत्वमिति परिशेषकृता
भिधानादिति भावः। अयोग्यताज्ञानस्येति विरुद्धत्वप्रमाया ज्ञानमेवात्रायोग्यताधीः। तत्र च विषयविधया विरुद्धत्वज्ञानमुपजीव्य
मिति भावः। दोषतादोषत्वेनोद्भूतत्वात तद्वाधत्वेपि तिएवंतज्ञानस्यायोग्यताज्ञानोपजीव्यत्वेनपदार्थस्य त्वेद्भूत्वत्वप्राचा राम
मिति अयंविरोधः विधिसाधने विधिसाधकृतयापर्यन्तविरुद्धसाधनेनिविषः। लिगत्रयेणोक्तथाव सरंगनुमयतयाकृष २६

कसंप्रदायासिद्धः ॥ त्रिलिंगत्रयं तदाह साध्यतत्साध्याभावेति । साध्यतावच्छेदकसंबंधावच्छिन्नसाध्याभावेत्यर्थः साध्यव्यापकाभावव्या
प्यत्वादिति । व्याप्यपदस्य स्वरूपासिद्धकृतपा साध्यव्यापकाभाववत्त्वादित्यर्थः । साध्यव्यापकाभाववत्त्वं च साध्यव्यापकतावच्छेदकरूपाव
च्छिन्नप्रतियोगिताकाभावः साध्यव्यापकविरुद्धत्वोपलंभादिति उपलंभपदस्याभेदपरतया साध्यव्यापकविरुद्धत्वादित्यर्थः साध्यव्यापकवि
रुद्धत्वं च साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताभाववत्त्वं हेतुभेदेन त्रयेणासुहृद्गणान्क्रमेण दर्शयति । धूमवानयमिति त्र
पधूमवत्त्वेनोपलभ्यमानो देशः । योग्यधूमे जियोग्यो बाधितः तेषाञ्च यथा धूमवत्त्वेनोपलभ्यमानो प्रदेशः धूमवान् धूमवत्त्वाप्रमि
त्यविषयत्वादिति वादिना प्रयुक्ते साध्याभावव्याप्यत्वेन साध्यविरुद्धत्वमुन्नीयते । प्रदेशो धूमवान् निरग्निकत्वादिति परे साध्यप्रयुक्ते
साध्यव्यापकाभावत्वेन साध्यविरुद्धत्वमुन्नीयते प्रदेशः धूमवान् जलाशयत्वादिति वादिना प्रयुक्ते साध्यव्यापकवत्त्वाद्वि
रुद्धत्वेन साध्यविरुद्धत्वमुन्नीयते इत्यर्थः ॥ स्वरूपासिद्धवारणाय प्रथमहेतौ प्रमात्वप्रवेशः तत्सत्त्वे तत एव वह्न्यभावस्याजिज्ञासुत्वयप्र
हायोविरुद्धत्वोल्लपनस्यानुचितत्वापत्तेः ॥ इदमुपलक्षणम् ... त्ववान् धूमत्वादित्यपराद्धेऽपि अस्मिन्नपि हेतौ कालभेदेन पुरुषभेदेन च त्र
याणामुन्नायकत्वं द्रष्टव्यम् । साध्यव्यापकविरुद्धोपलंभ इति साध्यव्यापकविरुद्धत्वेन च साध्यविरुद्धत्वोल्लापनकथावसरः कथकसंप्रदा
यासिद्धमित्यर्थः ॥ नन्वेवं विध्यमिति । कथावसरे कथकानां विरुद्धत्वोल्लापकस्य नन्वेवं विध्यमित्यर्थः । एतद् ज्ञानेऽपि साध्यव्यापकविरुद्धत्वस्या
ज्ञानेऽपि साध्याभाववति व्याप्यपदस्य साध्यसाध्याभावव्याप्यत्वेन साध्यव्यापकाभावेनापीत्यर्थः । ज्ञातस्य ज्ञानस्य दोषत्वात् इति कथावस
रे विरुद्धत्वदोषोन्नायकतायाः सकलतात्रिकासिद्धत्वादित्यर्थः । इति त्रयाणामधिकानामितरत्र विरुद्धत्वोन्नायकत्वोपाधिकमस्मिन्नित्यर्थः । तत्र सा

म॰ना॰ ध्याभावव्यापकाभावत्वादिनं हेतोरव्याप्यासिद्धं तयाऽन्यायवत्त्वासंभवादित्यभिमानः। तच्चासदेवेति तथा च तत्रापि साध्यव्यापकाभा
२७ वत्वविरुद्धत्वानामेव विरुद्धत्वोन्नयनसंभव इति भावः। इदमुपलक्षणं साध्याभावव्याप्यत्वस्यापि भेदाभेदसाधारणतया तेनापि तत्र त
दुन्नयनसंभवादित्यभिमानः। ननु धूमवान् धूमाभाववत्तया ज्ञायमानत्वादित्यादावुक्तनयनाविरुद्धत्वोन्नयनसंभव तत्रायस्य तत्रासत्वादि
त्यत आह धूमवान् पमिति। अत्र हेतावयुतभोऽन्यप्रमासाधारणानि विषयः तद्भयेति धूमप्रकारकलौकिकसाक्षात्कारविषयत्वादित्य
र्थः। अनेकान्तिकमेवेति। ननु विरुद्धत्वमित्यर्थः। प्रथमस्य धूमाभाववन्नाम्नमविरोधेधूमवतिद्वितीयस्यवाती द्वितीयधूमवत्साध्यसमा
नाधिकरणत्वादिति भावः। निषेधसाधनेपीति निषेधसाधकत्वया पाप्रयुक्तं निरुद्धसाधनेपीत्यर्थः।। त्रिविधं कथा वस्तरे लिंगनयेनो
वानुषिपतया कपकं संप्रदायासिद्धः। कुं लिंगत्रयं तदा हप्रतियोग्यपूर्वं लभादितिउपलंभकपरस्याभेदपरतया साध्यप्रतियोगित्वादित्यर्थ
ः। एवमग्रेपि हेतुभेदेन त्रयाणामुदाहरणादर्शयतिपथ्यथेति। अर्थत्त्पूर्ववता सर्वश्रायमिति विरोधवाधकाधर्म इति शेषविशेषणाक
राधिहेतुजावकेद्रव्यविशेषणाणाद्वारा पित्र नुमितः समं क्वचिद्विरोधा न्यपकः इति शेषः। सांप्रदायिकास्तु सच्चापमितित्रयं विरुद्धो हेतु
विधिसाधनविधिरूपसाध्यसामानाधिकरण्यं इविरोधिरूपसाध्यानुमितो वाधि विधः त्रिधा प्रमितः सत्प्रतिबंधकं कृत्रयत्राप्रमि
ततमाहसाम्ना साध्याभावेत्यादिना सर्वत्र प्राकारितायं चमत्यर्थः। प्रमित इति शेषपूर्ववता हेतुभेदेन त्रयाणामुदाहरणानि क्रमेणाह पथ्येति
एकस्मिन्नपि हेतौ कालभेदेन चत्रयाणामुदाहरणानि ध्यविरुद्धोपलंभः विरुद्धत्वप्रकारकोपलंभप्रातर्धकमिति शेषः इति त्रयाधिकरणम्
मिति। अत्र साध्यमाववद्याप्यत्वसाध्यव्यापकाभावत्वाद्यभावेनेतद्भयप्रमितत्वाभावादित्यभिमानः। अभिमानं निराकृत्य समाधत्ते अस २७

मानेति इदमुपलक्षणं साध्याभावव्याप्यवत्त्वस्यापि भेदाभेदसाधारणजयाततद्वृत्त्यापि प्रमितस्य तत्रासंभवः। न तु तथापि धूमवान
यधूमाभाववद्वृत्तिपाषाणमयत्वादित्यादिकं तत्रातिरिक्तमेव तत्र साध्याभावव्याप्यत्वादीनामभावादित्यत आह धूमवानयमिति। निषे
धसाधनेपि लिखेंवरूय सामानाधिकरण्यग्रहेपि त्रिविधः त्रिविधा ज्ञानात् प्रतिबंधकप्रतियोग्युपलंभात् साध्यप्रतियोगित्वप्रकारक
ज्ञानात् एवमपि विधर्मिपरो निर्देशः। सर्वं व्याप्यमिति अत्र पंचम्यकृता प्रयोजको धर्मः। साध्याभावव्याप्यत्वरूपविशेषणता तु ज्ञापकीतिस्त्र
नुमेष इति शेषः। तस्योदाहरणमाह यथेति त्यादुः। साध्याभावव्याप्यत्वादिज्ञानस्य साध्यसामानाधिकरण्यग्रहप्रतिबंधकत्वमानाभा
वात् तद्विरोधविषयकत्वात् साध्यासामानाधिकरण्यग्रहस्यापि प्रतिबंधकतया विभागस्य न्यूनत्वप्रसंगाच्च प्रांवक्तु सत्वा पक्षमिति अयं वि
रुद्धो हेतुः विधिसाधने धर्मवाधिसाध्यकान् त्रिविधः त्रिधा तां त्रिके छिन्नक्रूत्याहः तदहसु तएतद् ज्ञानमवीत्यमिममत्वासंगतेः अयं चेति विरो
धइति शेषः। बाधसंकीर्णः धूमविधुमाअश्वो गोरश्वत्वादित्यादौ आश्रयासिद्धिसंकीर्णः धूमविघथा कांचनमयो गोरश्वो गोत्वादित्यादौ
त्वरूपासिद्धिसंकीर्णः धूमविधयासरभि गोरश्वत्वादित्यादौ असाधारणसंकीर्णः धूमविधयानित्यः शब्दः शब्दत्वादित्यादौ स्पष्टार्थः। प्राचीन
मते सपक्षविपक्षगामित्वस्यैव साधारणत्वात्तत्साकर्थ्यं नास्ति हि वन्नच्यनचेवृत्तिमति विरुद्धे तत्सांकर्यमपि बोध्यं। वोधपरस त्रतियत्रसा
धारणायं दत्वा नुपसंहारित्वस्याप्युपलक्षकत्वात् साध्याभावव्यभिचरितत्वसमजि साध्यसामाना। धिकरणरूपव्याप्त्यभावासिद्धिसंकरो बाधत्वेरु
पासिद्धावन्यजरसर्वभ्यस वद्दिवसाध्यविशेषणतासिद्धिसाधनविशेषणतासिद्धिसंकरश्चनकापि साध्यतावच्छेदकविशिष्टसाध्यसामाना
धिकरणाभावविशिष्टहेतुमत्तावच्छेदकावच्छिन्नहेतोरेव विरोधतया तन्यतत्रो प्रसिद्धत्वादिति ध्येयं॥ विरुद्धग्रंथरहस्यं॥ ॥ समान

बलवद्बाधितेति समानबलजन्यतत्पुरुषीयबाधप्रतिबध्यसाध्यविपर्ययलिंगकत्वं तत्कालीनतत्पुरुषीयसत्प्रतिपक्षितत्वमित्यर्थः। तुल्यब
लविषसमानत्वं च तत्कालीनतत्पुरुषीयसाध्यानुमितिजनकत्वनिष्ठबलज्ञानसमानाधिकरणसमानकालीनज्ञानविषयत्वं स्व
पदलक्ष्यीभूतल्लिंगविशेषणाद्युत्तरमाह बलं चेति पक्षस्य हेतुमत्त्वादिति पक्षहेतुत्वसपक्षत्वादित्यर्थः। आदिपदात् विपक्षा
हेतुत्वपरिग्रहः। प्रथमसपक्षत्वसाध्यवत्त्वेन निश्चितत्वविपक्षत्वं च तदभाववत्त्वेन निश्चितत्वादित्यत्र सपक्षत्वसाध्याभाववत्त्वेन
निश्चितत्वविपक्षत्वसाध्यवत्त्वे न प्रतिहेतौ स्वहेतौ तु साध्याभाववत्स्यैव साध्यत्वात्। व्यतिरेकित्वादिति केवलव्यतिरेकित्वादित्यर्थः।
तत्र पक्षे प्रसिद्धेरिति भावः। दृष्टमुपलक्षणम्। अनुमितिप्रसिद्धित्वेपि एकत्र तदभावस्यावश्यपदत्वात् तत्र सकलव्याप्तीति। समानसाध्या
भावनिरूपितव्याप्तिपक्षधर्मतावत्त्वमित्यर्थः। समानबलवत्त्वमिति शेषः। व्याप्तिपक्षधर्मतापाः समानत्वं च तत्कालीनतत्पुरुषी
यसाध्यानुमितिजनकत्वनिष्ठसाध्यनिरूपितव्याप्तिपक्षधर्मतान्यतरभंग इत्यर्थः। व्याप्तिपक्षधर्मतयोरिति। समानसाध्याभावनि
रूपितव्याप्त्यादिविशिष्टपक्षधर्मताज्ञानविषयत्वमिति ज्ञानसमानाधिकरणसमानकालीनज्ञानविषयत्वं स्वनिष्ठत्वं व्याप्तिपक्ष
धर्मताविशेषितव्याप्तिपक्षधर्मतावत्त्वमित्यर्थः। समानबलवत्त्वमिति शेषः। व्याप्तिपक्षधर्मतापाः समानत्वं च तत्कालीनत
त्पुरुषीयसाध्यानुमितिजनकत्वनिष्ठसाध्यनिरूपितव्याप्तिपक्षधर्मतान्यतरभंग इत्यर्थः। व्याप्तिपक्षधर्मतयोरिति। समानसाध्याभा
वनिरूपितव्याप्त्यादिविशिष्टपक्षधर्मताज्ञानविषयत्वमिति ज्ञानसमानाधिकरणसमानकालीनज्ञानविषयत्वं स्वनिष्ठत्वं व्याप्तिप
क्षधर्मताविशेषणतास्वपदलक्ष्यीभूतलिंगपरामर्शविरोधेनेति। साध्यतदभावयोर्विरोधेनेत्यर्थः। तन्नादिति अत्र साध्यनिरूपितव्याप्ति

पक्षधर्मतान्यतरांशेऽन्वयः इत्यर्थः। व्याप्तिपक्षधर्मतयोरिति। समानसाध्याभाववन्निरूपितव्याप्तिविशिष्टपक्षधर्मताज्ञानविषयत्वमित्य
र्थः। समानविषयत्वमिति शेषः। ज्ञाननिष्ठसमानत्वं च तत्कालीनतत्पुरुषीयपरामर्शीयानुमितिजनकत्वविषयकसाध्यनि
रूपितव्याप्तिविशिष्टपक्षधर्मताज्ञानसमानाधिकरणसमानकालीनत्वं लिङ्गविशेष्यकसाध्यतदभावव्याप्यविशिष्ट
पक्षधर्मताप्रकारकपरामर्शीयत्वं च समवेतत्वमत्र इति पक्षोऽतादृशपरामर्शस्यापि प्राचीनमते ऽनुमितिजनकत्वादिति भावः। वि
रोधिव्याप्तिपक्षधर्मताज्ञानयोरिति। परस्परविरुद्धयोर्व्याप्तिपक्षधर्मतयोर्बुद्धिकरणो ज्ञानस्येत्यर्थः। अन्यतरत्वमा
त्वेति पमेवेति व्याप्तिपक्षधर्मतांशेऽन्यमत्वनिप्रमेनेत्यर्थः। एवञ्च प्रसिद्धस्यैव हेतुः नित्यत्वव्याप्तेति व्याप्तं व्याप्तिः श्राव
णात्वं श्रावणा पक्षीभूतः शब्दस्तद्वृत्तित्वाद्यारोपितमिति साध्याभावव्याप्तिविशिष्टपक्षधर्मतायाश्चारोपितमित्यर्थ
ः तथा च शब्दो नित्यः कृतकत्वात् शब्दो नित्यः श्रावणत्वादिना सत्प्रतिपक्षिते कृतकत्वादौ पक्षतायास्य संभवः। नित्यत्वादिरूपसा
ध्याभावव्याप्तिपक्षीभूतशब्दपोर्ध्वमर्द्वयोरेकाधिकरणवृत्तित्वाभावात् नित्यत्वादिरूपसाध्याभावनिरूपितव्याप्तिविशि
ष्टपक्षीभूतशब्दादिधर्मत्वप्रसिद्धेन ज्ञानस्यासंभवादिति भावः। साध्याभावव्याप्यस्येति। साध्याभावरूपसाध्यव्याप्यस्येत्यर्थ
ः। साध्याव्याप्यता साध्याभावरूपसाध्यव्याप्यता तथा च पक्षपक्षे साध्यमवाधितं तत्र तु तदितसाध्याभावव्याप्यपक्षधर्मता
रूपः क्वचित्पक्षधर्मसाध्याभावव्याप्यतारोपः एवं पक्षे पक्षे साध्यवाधितत्र तु च चितसाध्यपक्षधर्मतारोपः क्वचित्पक्षधर्म
साध्यव्याप्यत्वारोप इत्यर्थः। इत्थं च समानज्ञानीयसाध्याभावव्याप्यनिष्ठपक्षधर्मतानिरूपितविषयतावत्त्वसमानज्ञानीय

म·प्रु· पक्षधर्मनिष्ठसाध्याभाववद्व्याप्यतानिरूपितत्वनिरूपितत्वनिष्ठविषयताप्रतियोगिज्ञानत्वसमानाधिकरणविषयतावत्वं
२८ च समानत्वं त्वंच पदं लक्ष्मीभूतलिंगपरं ज्ञाननिष्ठसमानत्वमपि द्वयं साध्यव्याप्यवृत्तिपक्षधर्मतानिरूपितत्वनिष्ठवि
29 षयताप्रतियोगिज्ञानसमानाधिकरणसमानकालीनत्वं पक्षधर्मवृत्तिसाध्यव्याप्यतानिरूपितत्वनिष्ठविषयतानिरूपितत्व
निष्ठविषयताप्रतियोगिज्ञानसमानाधिकरणसमानकालीनत्वं च त्वपदं लक्ष्मीभूतलिंगपरं एवं विशिष्टेऽपरत्वेऽशिष्टमिति
न्यायेन साध्यतदभाववद्व्याप्तिपक्षधर्मतोभयावगाहिलिंगविशेष्यकपरामर्शविषयसर्वत्रसत्प्रतिपक्षे तादृशपरामर्शस्यापि प्रा
चीनतयेऽनुमितिजनकत्वादिति भावः। एकत्रेति। एकस्मिन्पक्षे साध्यव्याप्यसाध्याभावव्याप्ययो रूपयोरभावादित्यर्थः। एतच्चाप्र
सिद्धोऽयं त्वद्धेतुः विशिष्टस्याप्रसिद्धावुक्तविशेषसाध्याभावव्याप्तिविशिष्टपक्षधर्मत्वस्य बूचित्त्व साध्यव्याप्तिविशिष्टपक्ष
धर्मत्वस्याप्रसिद्ध्या तद्विशिष्टस्यारोपे हि पक्षसाध्याभावव्याप्यत्वविशिष्टपक्षधर्मत्वमप्रसिद्धं तत्र तद्विशिष्टस्यारोपासं
भवादित्यर्थः। यद्यपि साध्याभावव्याप्तिविशिष्टपक्षधर्मत्वादेरप्रसिद्ध्या तन्नानासंभवेऽपि साध्याभावव्याप्यत्वादेः पक्षधर्म
तारोपस्य पक्षधर्मे साध्याभावव्याप्यत्वारोपस्य संभवादिदमुक्तं तथापि पक्षयोर्नूं समानत्वद्वयं समानवषलत्वद्वयं
च समुच्चित्वं न क्वापि संभवति प्रत्येकं च परस्परमव्याप्त्यमतः प्रागुक्तमेवसमानवलत्वं निर्वाच्यं तच्चाप्रसिद्ध्या न संभवती
ति निगमनाभिप्रायः। अथ यत्समानज्ञानीयपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यतानिरूपितसाध्याभावव्याप्यत्वावच्छिन्नवि राम
षयतावत्वं समानबलत्वं समानबलत्वं च पक्षतावच्छेदकावच्छिन्नपक्षविषयतानिरूपितसाध्यत्वावच्छिन्नत्वनिष्ठवि २८

षयताप्रतियोगिज्ञानसामानाधिकरण्यसमानकालीनत्वं च पक्षतावच्छेदकावच्छिन्नत्वादिकं च वैशिष्ट्यं चेत् पक्षतावच्छे
दकावच्छिन्नविषयतानिरूपितसाध्याव्याप्यत्वावच्छिन्नत्वनिष्ठविषयताप्रतियोगिज्ञानसामानाधिकरण्यविशिष्टप
क्षतादेरसम्भवेऽपि न क्षतिः। पक्षविशेष्यकसाध्यतदभाववद्व्याप्यवत्तापरामर्शौ साध्यतदभाववद्व्याप्यविशेष्यकपक्षप्रका
रकपरामर्शौ वा सत्प्रतिपक्षौ तादृशपरामर्शयोरेव साध्यतदभावानुमितिजनकत्वादिति चेत्तथापि परस्परविरोधिनो
रम्योरेव बोधकत्वादिति मा गुरुर्दोषः स्पष्टरूढरता तरल। कोऽपरमतस्य चाप्रतिरस्कृतोपत्वा[illegible]तिति नवि॥
का॥ अत्र निर्द्धारिततद्विशेषे सतीति। वैशिष्ट्यं तत्पार्थः। अत्र च पश्चात्स्यबोधितसाध्यविपर्ययपक्षतया चानिर्द्धारिततद्विशे
षकपरामर्शे विशिष्टबोधितसाध्यविपर्ययकलिङ्गकत्वं सत्प्रतिपक्षितत्वमित्यर्थः। अनिर्द्धारिततद्विशेषकपरामर्शवि
शिष्टबोधितसाध्यविपर्ययकलिङ्गकत्वं सत्प्रतिपक्षितत्वमित्यर्थः। अनिर्द्धारिततद्विशेषे चागृहीतसाध्यव्याप्यव
द्विशेष्यकत्वं अगृहीतसमत्वकत्वमिति यावत्। तादृशेतरमाहुर्विशेषसतीति। व्याप्तिसंगाभंगरूपः साध्यव्याप्याभाप
वद्विशेष्यताकत्वमिति यावत्। व्याप्यो साध्यव्याप्यत्वेरूपे यो भङ्गोऽभावो पञ्च तद्व्याप्तिभङ्गसाध्यव्याप्यत्वावच्छिन्नप्रति
योगिताकाभाववदिति यावत्। तस्य विशेषितता संबन्धेन भङ्गासत्त्वपक्षे विक्षुत्पत्तेः एकस्य साध्यव्याप्यसाध्याभा
वव्याप्ययोरन्यतरस्येति यावत्। तन्निरूपमात्यहे भङ्गमिपमा ततश्चाव्याप्याभाववद्विशेष्यकत्वसाध्याभाववद्विशेष्य
कत्वान्यतरत्वरूपेणातद्वद्धारणां सर्वत्रैवास्तीति भावः। सत्प्रतिपक्षपूर्वपक्षरहस्यं यथासाध्यव्याप्यवान्पक्षः सत्प्र

म॰ष्व॰ ३० तिपक्षः येन केनचित्संबंधेन तद्वान् हेतुः सद्धेतौ पक्षितः तथापि तद्धेतस्तत्र इति पक्षव्यवहारोपपादकं रूपं साध्यवत्ययिपक्षे
30 साध्यतदभावव्याप्यवत्तापरामर्शयोः संवलनदशायां सत्प्रतिपक्षितव्यवहारात् साध्याभाववत्यपि पक्षे साध्यवत्तापरा
रामर्शयोः संवलनदशायां तादृशपरामर्शयोरेकत्राप्रामाण्यग्रहदशायां सत्प्रतिपक्षितव्यवहाराच्चेत्सपि तद्व्य
वहारोपपादकं लक्षणमाह साध्यविरोधीति। साध्यविरोधी साध्याभावः तत्तुल्यपनसमर्थः तदनुमितिजननस्वरूपयो
ग्यापापसमानासमानकालीनोपस्थितिः केवलवस्तूपस्थितिः तथाप्रतिबंधकविशिष्टोपः कार्यलिंगवृत्तसाध्यानुमितिरूप
कार्यजननसमर्थः साध्यव्याप्यतापरामर्शः तद्विशिष्टत्वमित्यर्थः। व्याप्तिपक्षधर्मतेति। साध्याभावव्याप्तिसंबंधि
त्वपक्षसंबंधित्वे इत्यर्थः। साध्याभावव्याप्तिसंबंधित्वं साध्याभावव्याप्तित्वावच्छिन्नविषयतानिरूपितपक्षतानिरूपि
तपक्षतावच्छेदकावच्छिन्नपक्षविषयत्वं पक्षसंबंधित्वं च पक्षतावच्छेदकावच्छिन्नपक्षविषयतानिरूपितसाध्याभावव्याप्
त्वावच्छिन्नविषयित्वं अनयोर्विनिगमनाविरहेणाद्वेकाल्पिकस्य पादानं अत्र साध्याभावव्याप्यवत्तापरामर्शविषयप्रामाण्य
ग्रहसत्वे सत्प्रतिपक्षितव्यवहाराभावात् तद्वारणाय तद्रूपपरोपांतसमुपस्थितिविशेषणं एवं साध्यव्याप्यवत्तापरामर्शनिष्ठ
प्रामाण्यग्रहसत्वेपि सत्प्रतिपक्षितव्यवहाराभावात्तद्वारणाय नर्थकं तत्परामर्शविशेषणं। अप्रामाण्यग्रहानां तत
पापरामर्शस्यानानुमितिजननस्वरूपयोग्यः। अनाहार्याप्रामाण्यकपरामर्शत्वेन कारणत्वाभ्युपगमे हीताप्रामाण्यकपरामर्श तम
स्यापि विशेषणत्वेनादिति ध्येयाऽनुमितिजननस्वरूपयोग्यतया। गृहीताप्रामाण्यकपरो निरुक्तकेवलवदुपस्थितिविनस्वरूप ३०

पोग्यतालाभाय वत्तवत्वमुपस्थितिविशेषणं इत्यस्थितत्वमपि न निवेशनीयं यथोक्तत्वरूपयोग्यतायाः अन्यत्राभावात्
साध्यव्याप्यतापरामर्शनिविशिष्टत्वं च विलक्षणाविषयतासंबन्धेनावच्छिन्नेति तेन साध्याहेतोर्नातिप्रसंग इति ध्येयं अत्रेदं य
घटप्रामाण्यज्ञानोत्पत्त्युत्तरं चेष्टप्रतिबन्धकं तेन च परामर्शनिष्ठकारणतापर्याप्तिरित्तु द्रव्यत्वे इदं जहाः प्रामाण्यज्ञानानास्कन्दि
तपरामर्शस्याप्यनुमितिजननमतः स्वरूपयोग्यव्यवहार इति प्रसंगो दुर्वारो वाऽङ्कि च प्रामाण्यज्ञानानाक्रान्तसाध्यतद
भाववोभयव्याप्यतापरामर्शस्यापि साध्याभावाभावत्वादिरूपेण वत्तत्र वाधावतारेस त्वतिप्रसक्तितव्यवहारस्तदा । ऽतिप्रसंगो दुर्वार इद्य
स्वरसात्तत्क्षणे तातिरमाहविरोधिवेधकान्यति । साध्याभावानुमितिविरोधिवेद्यो । प्रामाण्यग्रहादितत्समवहितान्यत्वविशे
शिष्टत्वर्थः । एतन्नेगमकतोपपिरूपविशेषणाविरोधिता च साध्यव्याप्यवत्तापरामर्शनिष्ठविरोधितातिरिक्ता स्यात्तेन नासं
भवः । गमकतोपपत्तिरूपसंपत्तिमत्त्वेऽपि हि वैशिष्ट्यतैतीपार्थ्यः । ज्ञापमाने नेतिरिक्तमानत्वं रूपत्वस्वर्थः । तथा च गमकतोपपि
कविशिष्टस्वसमानकालीनज्ञानेन प्रातिबध्यविशिष्टापः कर्मपा साध्यानुमितिकारणत्वरूपयोग्यासाध्यव्याप्यवत्तापरामर्शस्तद
त्वमित्यर्थः । केऽरणोऽशक्तः कार्यत्वादिति व्यत्नेगमकतोपपिरूपं वपत्ततापाकेदकावच्छिन्नविषयतानिरूपितसाध्याभाववव्या
प्यवत्वावच्छिन्नविषयितत्वसाध्यानुमितिस्वरूपयोग्यत्वं च साध्यानुमितिविरोधासमवहितत्वे विरोधिता तत्साध्याभाववव्या
प्यवत्तापरामर्शनिष्ठविरोधिताव्याप्यवत्ताव्याप्त्या तेन नासंभवः । न चैवं साध्यातदभाववव्याप्यवत्तापरामर्शयोरेकत्र प्रामा
ण्यपतितर्थः परंतु तद्विरहेऽपि सत्त्वेऽतिप्रसक्तिव्यवहारापत्तिः विरोधासमवहितत्वस्यैवाप्रामाण्यग्रहासमवहितत्वस्यापि ति

३१ विशेषसाध्यतदभावव्याप्यवत्तापरामर्शयोरुभयोरेवाप्रामाण्यग्रहादशायामपि सत्प्रतिपक्षत्वव्यवहारापत्तिरिति वाच्यं तादृशपरा
31 मर्शयोरुभयत्राप्रामाण्यग्रहे एकत्राप्रामाण्यग्रहे परत्रैव तद्ग्रहेऽपि सत्प्रतिपक्षत्वव्यवहारस्येष्टत्वात् अन्यथा समानबलत्वे हि स
त्प्रतिपक्षतो ननु हीनबलाधिकबलतोर्नहि भवति सत्प्रतिपक्षः प्रतिपक्षोद्धारितासाधकत्वेति सत्प्रतिपक्षविचारावसरे दीधितिकृतामभिधाना
त्। तत्र तुल्यबलत्वं मानादृत्तदुद्व्याप्तिविशेषः। तथा च वृत्तिमिष्टापत्तिरिति चेन्न अप्रामाण्यग्रहस्य बलत्वाभावात् सत्प्रतिपक्षे हीनताप्रामाण्य
कृविरोधिपरामर्शगतहीनताप्रसाधकापादकापि साध्यवत्तापरामर्शादनुपादानतत्परं तु अप्रामाण्यग्रहाभाव एव बलत्वे एकत्राप्रामाण्य
ग्रहे परत्र न तदुत्कर्षः तस्मादनुमितेरनुत्पादात् तस्यैवं साध्यतदभावव्याप्यवत्तापरामर्शयोरुभयत्रैवाप्रामाण्यग्रहे सत्प्रतिपक्षितानभ्यु
पगमापत्तिः अप्रामाण्यग्रहाभावस्य बलतयापादकत्वाभावादिति वाच्यम् तुल्यबलत्वादिति भावः। व्याप्तीतितथा च व्याप्तिपक्षधर्म
त्वाभाववद्विलक्षणहेतुरसिद्ध इति भावः। अत्र घटोऽद्रव्यं सत्त्वादित्यादौ व्याप्यत्वासिद्धेः सत्प्रतिपक्षे जलह्रदो वह्निमान् धूमादित्यादौ स्व
रूपासिद्धेः संग्रहोपपत्तये धर्मत्वस्य प्रवेशः। व्याप्तिश्च साध्याभाववदवृत्तित्वं सति साध्यसामानाधिकरण्यरूपा यथा स्यात्तथानुहेतु
व्यापकसाध्यसामानाधिकरण्यरूपा द्रव्यं सत्त्वादित्यादिव्याप्यत्वासिद्धिस्थले तदप्रसिद्ध्या संभवापत्तेः पक्षधर्मत्वं च हेतुतावच्छे
दकसंबन्धेन हेतोः पक्षवृत्तित्वमपि नहृतिः व्याप्तिपक्षधर्मतयोः प्रत्येकाभावघटितं वा। सिद्धेः व्याप्तिविशिष्टपक्षधर्मत्वाभावो वा। अत्राघ
टकप्रत्येकेति। प्रत्येकाभावस्येत्यर्थः। अत्र ननु गमात्सर्वासिद्धसाधारणोत्वात् ह्रदो वह्निमान् धूमादित्यादिस्वरूपासिद्धे व्याप्य राम
त्वाभावस्य घटोऽद्रव्यं सत्त्वादित्यादिव्याप्यत्वासिद्धेः पक्षधर्मत्वाभावस्य सत्त्वादित्यपि प्राप्तः अनुगतः प्रत्येकाभावमात्रवत्त्वमपि व ३१

र्त्तमानप्रत्येकाभावाव्याप्तिरिति प्रत्येकासत्त्वादित्यसिव्याप्तिरित्यर्थः। ननु विशिष्टस्यातिरिक्तत्वे अव्याप्तिप्रायेणाशंकते अथेति। प्रत्येका
भावेऽनुमतः प्रत्येकाभावमात्रवृत्त्यपि वर्त्तमानप्रत्येकाभावाव्याप्तिरिति प्रत्येकाभावमात्रवृत्त्यव्याप्तिरित्यर्थः ननु विशिष्टस्यातिरिक्त
त्वेपि तदभावः प्रत्येकाभावस्थलेपि वर्त्तत एवेति नाव्याप्तिरित्यत आह अप्रसिद्धत्वादिति अननुगम इति तदवस्थ इति शेषः
अननुगत इति प्रत्येकाभावमात्रवृत्त्यपि वर्त्तमान इत्यर्थः इतीति व्याप्यादिप्रत्येकाभावरूपस्याप्रसिद्धत्वपतिशेषः। तत्प्रत्ये
काभावाव्याप्तिरिति व्याप्यादिप्रत्येकाभावरूपेऽसिद्धिलक्षणाव्याप्तिरित्यर्थः। विशिष्टाभावत्वस्याप्रसिद्धत्वात्तस्य च प्रत्येकाभा
वयोरसत्त्वादिति भावः। इदमुपलक्षणं। अयोगोलकं धूमवद्वह्नेः इत्यादौ वह्निमान् धूमादित्यादौ वा च संकीर्णासिद्धेः सिद्धलक्षणासा
ध्याव्याप्तिः तत्र विशिष्टस्याप्रसिद्धत्वात्तदभावस्याप्यसिद्धेरित्यपि बोध्यं। ननु प्रत्येकाभावज्ञानेऽस्यानुमितिप्रतिबंधकत्वेपि न तस्याप्रसि
द्धिमात्रेणाव्याप्तिरित्यत आह अन्यथेति तेन प्रत्येकाभावानां हेत्वाभाससामान्यलक्षणाक्रान्ततानामिति शेषः। साध्याद्यभेदेन
व्याप्यादीनां नानात्वाद्धेतु वचनात् प्रत्येकाभावः प्रत्येकाभावः ज्ञानं न तु स्थितः न तु साक्षात् तथा च हेत्वाभाससामान्यलक्षणामेव तत्र ना
स्ति अनुमिति तत्कारणपरामर्शयोः साक्षात्प्रतिबंधकत्वस्य तल्लक्षणघटकत्वादिति भावः। अत एव साक्षादेव नात्याभावावगाहित्वा
दिति भावः। ननु साध्यव्याप्यहेतुः पक्षवृत्तिरित्याकारकाविशेषकुलित व्याप्तिपक्षधर्मतेदमुपलक्षणं। अप्रसिद्धसाध्यविशेष
णासिद्धसाधनविशेषणासिद्धिहेत्वसिद्धिषु चाव्याप्तिरित्यपि बोध्यं दोष एव नेति हेत्वाभास एव नेत्यर्थः कुत इत्यत आह शेषासिद्धिरि
ति शेषः प्रत्येकस्य प्रत्येकाभावस्यासमर्थत्वे नाह एषणासमर्थत्वेन। आभासत्वेनेति यावत् अन्यथासिद्धेरिति विशिष्टाभावस्य हेत्वा

३२ भासत्वविनापि विशिष्टाभाववत्तया साधनस्य दुष्टत्वव्यवहारोपपत्तेरित्यर्थः। विशिष्टाभाववति प्रत्येकाभावस्यावश्यकत्वमिति भा-
वः। ननु साध्यव्याप्यो हेतुः पक्षवृत्तिरित्याकारकव्याप्तिपक्षधर्मताभयविषयकपरामर्शस्यानुमितिहेतुत्ववादिनां प्राचां नये साध्यव्याप्य-
32 त्वे सति पक्षवृत्तित्ववान् हेतुरिति व्याप्तिविशिष्टपक्षधर्मताप्रकारकपरामर्शत्वस्यानुमितिहेतुतया तद्विरोधित्वमविशिष्टाभावस्या-
पि हेत्वाभासत्वे इवोर विनिगमकाभावेन तादृशविशिष्टप्रकारकपरामर्शप्रतिबन्धकत्वस्यापि सामान्यलक्षणाघटकतया साध्य-
व्याप्यहेतुमान् पक्ष इति पक्षविशेष्यकपरामर्शस्यैवानुमितिहेतुत्वमिति नव्यमतानुयायित्वे व्याप्तिविशिष्टपक्षधर्मत्वोपाध्यु-
र्दोषः प्रत्येकाभावस्यापि दोषत्वाभ्युपगमासङ्गतेः। पक्षवृत्तित्वाभावज्ञानस्य तादृशपक्षविशेष्यकपरामर्शप्रतिबन्धकत्वादि-
त्यरुचेराह व्यर्थविशेषणत्वादिति। इदमसाधकव्याप्तिविशिष्टपक्षधर्मत्वाभावादित्यसाधकतानुमानपक्षधर्मत्वाभावादित्य-
स्यैव समर्पकं न व्यर्थविशेषणत्वादित्यर्थः। तथा च हेत्वाभासत्वस्य व्याप्यत्वनिनियमात् व्यर्थविशेषणतापन्नविशिष्टाभावे
तदभाववत्त्वस्य हेत्वाभासत्वं न चैवं तत्र सामान्यलक्षणातिव्याप्तिरिति वाच्यं। तस्य हेत्वाभासत्वाभावेऽनापत्त्याविशङ्कितव्या-
प्तिपक्षधर्मताभयविषयताशालिपरामर्शप्रतिबन्धकत्वस्यैव सामान्यलक्षणे निवेशनीयत्वादिति भावः। ननु इदमप्ययुक्तं व्य-
र्थविशेषणत्वेऽपि व्याप्तिसत्त्वाद्विशिष्टाभाववत्त्वस्य प्रत्येकाभावत्वाघटिततया विशिष्टाभावस्यातिरिक्तत्वेन धूमप्रागभाववह्निष-
र्निकृतपाच वैयर्थ्यं न च कृशाङ्कुत्यरुचेराह प्रत्येकाभावमिति। उपजीव्यत्वादिति प्रत्येकाभावज्ञानस्योपजीव्यत्वादित्यर्थः। तथा च प्रराम
त्येकाभावज्ञानस्योपजीव्यतया प्रत्येकाभावस्यैव हेत्वाभासो ननु विशिष्टाभावस्य न्त्रामस्य प्रत्येकाभावज्ञानोपजीवकत्वात्। सामान्य ३२

लक्षणोक्तानाप्यव्याविशकलितव्याप्तिपक्षधर्मताभावनिषपता शालिपरामर्शप्रतिबंधकत्वस्यैवनिवेशान्नातिव्याप्तिरितिभावः। नान्विदम
प्यनुत्पन्नप्रत्यक्षाभावमतीत्वापि प्रत्यक्षशब्दाभ्यांलिंगांतरजन्यानुमानेनचविशिष्टाभावज्ञानसंभवात्तन्नचतथापि प्रत्यक्षाभाववल्लिं
गकानुमानेनविशिष्टाभावज्ञानं प्रति प्रत्यक्षाभावज्ञानस्योपजीव्यत्वमस्त्येवेति वाच्यंविशिष्टाभावल्लिंगकानुमानेनप्रत्यक्षाभावज्ञा
नं प्रति विशिष्टाभावज्ञानस्योपजीव्यत्वेनक्लृप्तिरुपजीव्योपजीवकभावस्याविशेषादित्यरुचेराहविशिष्टाभावानुद्भावनेपीति। ए
तदर्थाततः। एवंसतिविरुद्धत्वादेरपिहेत्वाभासत्वंनस्यात्तदनुद्भावनेपि बाधस्वरूपासिद्ध्यादेरुद्भावनेवादिनिवृत्तेः नचतत्रबाधा
देरनुद्भावनेपि विरुद्धत्वमात्रोद्भावनेवादिनिवर्त्तनेऽतोविरुद्धत्वस्यापि हेत्वाभासत्वमत्रतुप्रत्यक्षाभावानुद्भावने विशिष्टाभावमात्रो
द्भावनेपिनवादिनिवृत्तिरितिनविशिष्टाभावस्यदोषत्वमितिवाच्यं। विशिष्टाभावमात्रोद्भावनेपिवादिनिवृत्तेः। तस्मात्तसाध्यव्या
प्यत्वेसातिपक्षवृत्तित्ववान्हेतुरितिपरामर्शस्यानुमितिहेतुत्ववादिनांप्राचांनयेव्याप्तिविशिष्टपक्षधर्मत्वाभावव्रहेतुर
पिहेत्वाभासःसचव्याप्यत्वासिद्धावेवांतर्भूत इति तत्वात्मत एवेति। निरस्तमित्यनेनान्वयः। व्याप्तीति व्याप्तिपक्षधर्मताभयमा
त्रमुख्यविशेष्यकबुद्धिमुख्यविशेष्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववत्वमित्यर्थः। नातोविशेषाभावसामान्याभावावि
रुद्धत्वस्याभावाज्जव्याप्त्यसंभवशंकावकाशः। अधिकं तु सिद्धांतत्वस्यामः। प्रत्यक्षाभावानुगतमिति। व्याप्तिपक्षधर्मतयोःप्रत्यक्षा
भावरूपेवर्त्तमानत्वमित्यर्थः। तदसिद्धत्वंव्याप्तिसिद्धत्व। नचैवंव्यभिचारादेः कथंदोषत्वंतथाचहेतोरसिद्धेरावश्यकत्व
नतस्यैवदोषत्वसंभवादित्यतआहव्यभिचारादावितिव्यभिचारादिमति हेतावित्यर्थः। आदिना विरोधपरिग्रहः। उपजीव्यत्वेन

तिव्याप्ति रूत्वज्ञानं प्रति लिंगज्ञानविषयाव्यभिचारादि ज्ञानस्योपजीव्यत्वेनेत्यर्थः। प्राथम्यात् प्रथमोपस्थितत्वात् तदुद्भावने
व्यभिचारमात्रो द्भावने। विरोधित्वाविशेषाच्चेत्यपि द्रष्टव्यं। समोपि व्यभिचारादि रपि तु पावतत्त्वेवमसिद्धि ज्ञानोपजीव्य
त्वाद्यक्त त्वेनोपाधेरपि दोषांतरं स्यात् तत्र आहतदे तिव्यभिचारादिमतिदोहेतोवित्यर्थः। व्याप्यत्वासिद्धेर्थव्याप्यज्ञानार्थं
। उपाधेरित्वितितु शब्दाभिलक्तमेउद्भावितदत्यनंतरं पोन्यः विप्रतिपद्यते पीतिव्याहोविप्रतिपद्यतेपीत्यर्थः। विप्रतिप
त्तिर्भ्रमः तथा चोपाधेरुद्भावने पिव्याप्तिभ्रमोदयात् तस्य साक्षादेव विरोधित्वाभावेन न हेत्वाभासांतरत्वमिति भावः। किं चोपा
धि ज्ञानं नासिद्धि ज्ञानोपजीव्यं किं तु तद्व्यभिचार ज्ञानमेवत्याहतस्येति। अ सिद्धत्वस्येत्यर्थः। उन्नयत्वतउपाधितोउन्नेयत्वात्
व्यभिचारिणो वउपाधिव्यभिचारितोव तु उन्नयना तत्र असिद्ध्युन्नयनात्। एतच्चोपाततः व्यभिचारस्यैव न उपाधेरप्युप
पकत्वसंभवात्। तथाप्युपाधि व्यभिचारस्य हेत्वाभासांतरतापा दुर्वारत्वान्न चेत्किं तु पर्वतान्तपुन्निरवसमीचीनेतिद्रष्टव्याम् असि
द्धिबुद्धिरिति। प्रत्यक्ष शब्दाभ्यां लिंगांतरजन्यानुमानेन वा सिद्धिबुद्धिरित्यर्थः। उपधेयेति। उपधेयपयोः असिद्धव्यभिचारिणो
र्धर्मिणोः संकरेपि अभेदेपि उपाधेरसिद्धस्य व्यभिचारित्वादेर्धर्मस्यासंकर एव ज्ञानासंकर एव परस्परं न हेत्वालीनत्वहेतिविपत्य
मेवेति पावत्। तथाच्चाद्यत्वादेर्धर्मस्यासंशयासमप्रिव्यभिचारादिमात्रज्ञानात् व्याप्ति ज्ञानानुदयेन तस्यापि स्वतः प्रतिबंधकत्व
मावश्यकमेवेति भावः। अतएवेति विद्भागोतित्यर्थः। तथापि धबुद्धि विशेष्यतावच्छेदकत्वरूपस्य विशेषणतायास्तद्भूषकताया मान
प्रयोजकत्वात्तत्पायाविधबुद्धि। मुख्य विशेष्यतावच्छेदकप्रकारकज्ञानस्यानुमितितत्करणपरामर्शविरोधित्वादितिपावतइपे ३३

नरूपेण ज्ञानमनुमितिस्तत्करणपरामर्शान्यतरप्रतिबंधकत्वं तदेव वा विभाजकतावच्छेदकतावच्छेदकमित्यभिमानः। पक्ष
व्यर्थविशेषणत्वात् तथापि हेतुरसाधकः निरुक्तबुद्धिमुख्यविशेष्यतावच्छेदकत्वावच्छिन्नप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियो
गिताकाभाववत्त्वादिरसाधकतानुमानेन निरुक्तबुद्धिमुख्यविशेष्यतावच्छेदकत्वरूपस्य विशेषणस्य व्यर्थत्वात् व्याप्तित्वा
वच्छिन्नप्रतियोगिताकाभाववत्त्वेनैव व्याप्यभावस्य पक्षधर्मतात्वावच्छिन्नप्रतियोगिताकाभावत्वेनैव च पक्षधर्मत्वाभावस्य
हेतुत्वसंभवादित्यर्थः। असाधकतानुमापकतावच्छेदकरूपमेव च विभाजकतावच्छेदकमित्यभिमानः। एतत्पापातः। वि
रोधितावच्छेदकरूपमेव विभाजकतावच्छेदकमिति नियमे मानाभावात् विरोधितावच्छेदकस्यापि पूर्वव्याप्तिचारादेर्विभजनात्
एवमसाधकतानुमापकतावच्छेदकमेव रूपं विभाजकतावच्छेदकमिति नियमे मानाभावात् व्यर्थविशेषणत्वस्य व्याप्य
विघटकतया तस्यापि असाधकत्वानुमापकत्वसंभवाच्च तथाविधबुद्धिमुख्यविशेष्यतावच्छेदकत्वावच्छिन्नप्रतियोगि
ताकाभाववस्य व्याप्तित्वावच्छिन्नप्रतियोगिताकाभावत्वाघटितत्वात् व्यर्थविशेषणतांशकापात्र्यनवकाशात्कृत
तत्त्वज्ञाप्या अप्रसिद्धिसाध्यविशेषणाप्रसिद्धिहेतुविशेषणाप्रसिद्धिहेत्वप्रसिद्धिघव्याप्तिरेव दोषो बोध्यः। एवमन्येपि
व्याप्तित्वपक्षधर्मतात्वान्यतरधर्मावच्छिन्नप्रतियोगिताकाभावे गतिरित्यर्थः। पक्षान्यतरपदव्यत्यासेन व्याप्तिसामान्या
भावपक्षान्यतरासिद्धिरित्यर्थः। पथ्यास्तु तत्सामान्याभावविशेषाभावविकल्पानामव्याप्त्यतिव्याप्तिप्रसंगस्य दुर्वारत्वादिति
ध्येयं॥ प्रत्येकाभावस्येति प्रत्येकाभावत्वप्रकारकप्रत्येकाभावज्ञानस्येत्यर्थः। दोषत्वात् प्रतिबंधकत्वात् तत्प्रत्येकाभावत्वाज्ञा

म.पु.
३४
34

नेवान्यतरत्वप्रकारकज्ञानस्याप्रतिबंधकत्वादिति शेषः। तथा च विरोधितानवच्छेदकतया पृथगस्य विभाजकतावच्छेदकत्व
मिति भावः। असाधकेति असाधकतानुमानेऽन्यतरत्वरूपस्य विशेषणतास्य व्यर्थत्वादित्यर्थः। प्रत्येकं व्याप्तित्वावच्छिन्नप्रतियोगि
ताकाभावत्वेनैकगमकत्वसंभवादिति भावः। व्याप्तिपक्षधर्मतेति हेतुतावच्छेदकावच्छिन्नहेतुविशेष्यकसाध्यतावच्छेदकाव
च्छिन्नसाध्यनिरूपितव्याप्तिविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षधर्मताप्रकारकत्वमभिन्नज्ञानविरहस्य इत्यर्थः। तदृतादशज्ञा
नस्य पक्षतावच्छेदकाद्यंशेऽभ्रमत्वनियमादिति भावः। आदिना स्वरूपासिद्धिसाध्यसाधनविशेषणासिद्धिव्याप्यत्वासिद्धीनां प
रिग्रहः। तासामिति समनन्तरोक्ताप्रसिद्ध्यादिषु तादृशपक्षधर्मत्वप्रकारकज्ञानस्य भ्रमत्वादित्यर्थः। अनुमितिप्रामित्याप
त्तेरिति अनुमितेरपि अभ्रमत्वापत्तेरित्यर्थः। एवं तादृशज्ञानाविरहवान् हेतुरसिद्ध इत्यसिद्धलक्षणामिति भावः। तदृषी
तेति निरस्तमित्यन्वयः। निरासे हेतुमाह व्यर्थेति। विशेषणस्येत्यमिति शेषस्य व्यर्थत्वात् तदूषकतायामप्रयोजकत्वादित्य
र्थः। परामर्शप्रतिबंधे विशेषणात्तत्प्रकारकाभावज्ञानस्याप्रतिबंधकत्वादिति भावः। हेत्वन्तरमाह तद्ज्ञानेपीति। प्रत्ये
कज्ञानस्यासंभवादिति प्रत्येकज्ञानस्य तथा च प्रत्येकाभावस्याप्यसिद्धिरूपत्वाद्व्याप्तिरिति भावः। प्रत्येकाभावेऽप्यसि
द्धिलक्षणस्याव्याप्तिमभिधाय साधनविशेषणासिद्ध्यादिस्थले हेतुतावच्छेदकविशेषासिद्धिविशिष्टहेत्वादेरसिद्धतेहे
तास्यासंभवमाह वस्तुतस्त्विति। अहेतुत्वेति। हेतुतावच्छेदकहेतुतावच्छेदकविशिष्टहेतोरित्यर्थः। एतदप्रसि
द्धिःपर्वतो वह्निमान् कांचनमयधूमादित्यादि साधनविशेषणासिद्धिस्थले बोध्या व्याप्यतेति साध्यतावच्छेदकविशिष्टसा ३४

ध्वनिरूपितव्याप्तेरित्यर्थः। एतदप्रसिद्धिश्च पार्वतः काञ्चनमयपर्वतो वह्निमान्धूमादित्यादिसाध्यविशेषणासिद्धिस्थले बोध्या।
पक्षधर्मतेति पक्षतावच्छेदकविशिष्टपक्षनिरूपितधर्मत्वस्येत्यर्थः। एतदप्रसिद्धिश्च काञ्चनमयः पर्वतो वह्निमान्धूमादि
त्यादित्र्याश्रयासिद्धिस्थले बोध्या। वैशिष्ट्यस्येति व्याप्तिपक्षधर्मतोभयवैशिष्ट्यस्येत्यर्थः। एतदप्रसिद्धिश्च अयोगोल
कं धूमवद्वह्नेः ह्रदो वह्निमान्धूमादित्यादिबाधसंकीर्णस्थले बोध्या। न च वैशिष्ट्यस्येत्यत्र द्वन्द्वसमासे द्विवचना
पत्तिः। समाहारद्वन्द्वस्यापि एतद्विषयतया अप्रवृत्तेरसम्भवादिति वाच्यं। सर्वत्र द्वन्द्वे विभाषयैकवचनं भवतीत्यनुशा
सनादितरेतरद्वन्द्वेऽप्येकवचनसम्भवात्। न चैवं धवखदिरमित्यपि प्रयोगापत्तिरिति वाच्यं। द्विद्वैकत्वमिति सूत्रे राद्धद्वन्द्वस्यै
कवचनत्वे नपुंसकलिङ्गत्वावश्यकत्वबोधनात्। न चैवं समाहारेतरेतरयोः को भेद इति वाच्यं। समाहारद्वन्द्वस्य समाहार
त्वप्रकारकबोधजनकत्वेनैव भेदात् तत्रैव वचननियतविषयत्वादित्यलमधिकेन। नन्वत्र हेतुतावच्छेदकादिवैशिष्ट्यवै
ज्ञानं न तु वास्तविकं येन साध्यविशेषणासिद्ध्यादिस्थले प्रसिद्ध्यप्रसिद्ध्या न तथात्वं च हेतुतावच्छेदकादिवैशिष्ट्यवै
तावच्छेदकरूपेणाप्य तद्धर्मत्वं चावगाहते परामर्शो व्याप्यो हेतुः पक्षवृत्तिरित्याकारकोऽपि भ्रमात्मकपरामर्शसत्त्वात् हेतुतावच्छेदकरूपेण साध्यव्याप्यत्वपक्ष
त्वमिति फलितार्थः। इत्थं चाहत त्वप्रामितेश्चेति। असिद्धिस्थले भ्रममभिलताहेतुप्रतीतिरित्यर्थः। ननु व्याप्तिपक्षधर्म
ताप्रमितिपदेन पक्षहेतुविशेष्यकप्रमात्वसाध्यनिरूपितव्याप्त्यादिप्रमितिर्ना विवक्षिता किं तु पक्षविशिष्टविशेष्यकत्वे ध्वनिरूपितव्या
विशिष्टपक्षविशिष्टधर्मत्वप्रकारकपक्षविशिष्टहेतुविशेष्यकप्रमितिरेव विवक्षिता तद्धि रहस्यं न तत्सामान्याभावः किं तु त

म॰ पु॰ प्रतियोगिकाभावमात्र तेन हेतुत्वं तरे साध्यं तरिपव्याप्यादि प्रमिति सत्वदशायां नाव्याप्तिरित्यत आह यत्किंचिद्व्याप्तीति यत्किं
३५ चिद्दृत्तिपूर्तेपिस्वधटते यत्किंचिन्निरूपितव्याप्तिविशिष्टपक्षिंचित्पक्षधर्मत्वप्रकारकपदे तु विशेष्यकप्रमिति प्रतियोगिकाभा
35 व इत्यर्थः। ननु हेतुतावच्छेदकरूपेणाहेतौ साध्यतावच्छेदकरूपेण साध्यनिरूपितव्याप्यत्वं पक्षतावच्छेदकरूपेण पक्षधर्मत्वं
चावगाहते या प्रमिति तयति। अत्र मनिरूपितविशेष्यतावच्छेदकता संबंधेन हेतुतावच्छेदके तदभावोऽसिद्धिः अप्रमानिरूपितविशे
ष्यतावच्छेदकता संबंधावच्छिन्न तादृशप्रतीत्यभाववद्धेतुतावच्छेदकता संबंधेन तत्तीपतादृशप्रतीति विरहो वा विवक्षितः तेन स
वंधेन यस्य कस्य चित पुरुषस्य तादृशप्रतीति विरहो वा तो नसंबंधेन तादृशप्रतिति सामान्याभावो वा नाघो महेत्वपिसत्वात तत्त
स्योदर्थपत्वात्पर कूपप्रतीतेरप्रोयप्रत्वादित्यर्थः। ननु व्याप्यभावादिहेतुमात्रस्व परसाधारणतादृशप्रतीत्यभावो प्रत्येकस्यत
त्याह व्याप्यभावादिति। ननु स्वरूपसन्नेवापप्रतिबंधकोऽतोऽत्र रूपत्वेपि नव्याप्तिरित्यत आह यदि चेति। प्रमितिविरहः अप्रमानिरूपि
तविशेष्यतावच्छेदकता संबंधेन तादृशप्रतीति सामान्याभावः तदतिरिक्त हेतावित्ति शेषः तादृशाभावस्य प्रतिबंधकस्यत
त्वादितिभावः तत्र ज्ञानाभावादिति हेत्वाभाससामान्यलक्षणाभावादित्यर्थः। अन्यतरत्वमिति अन्यतरत्वमित्यर्थः। पक्ष
वृत्तेरन्यतरत्वस्यासिद्धिधर्मतापागसिद्धिरित्यस्यानवृत्तापत्तेः। नन्वन्यतरत्वमन्यतरत्वयोः प्रत्येकमात्रवृत्तत्वात् तथा च प्रमितिदृप्या
भावस्थले व्याप्तिरित्यत आह अन्यतरत्वमिति। एतेनातिविवृत्तोतिव्यर्थविशेषणत्वादिरिति। पूर्ववत्व्याप्तिरिति पक्षव्या राम
प्तिपक्षधर्मतोभयप्रकारकनिर्णयपरत्यर्थः। तदभावः विषयतासंबंधेन प्रकृतहेतौ तदभावव्याप्यादिप्रमादनुमितिर्नस्यादि ३५

ति पूर्वोक्तबाधकमुद्धरति अत एवेति । अत एव विषयतासामान्येनैव भ्रमप्रमासाधारणात्वी पतदुभयप्रकारकनिर्णयसामान्याभा
वोऽसिद्धिर्न तु भ्रमानिरूपिततद्विषयतासंबंधेन तद्विपरसाधारणपतादृशनिर्णयाभावो । तत एवेत्यर्थः तदा व्याप्त्यादिभ्रमदशायां सि
द्धिः व्याप्तिपक्षधर्मतोभयप्रकारकनिर्णयादनुमितिरिति शेषः । न चैवमिति एवं स्थीपतदुभयप्रनिर्णयाभावदशायामिति शेष
। तदाभासस्यापि पर्वतो वह्निमानाकाशादित्यसिद्धहेतावपि स्थीपतदुभयनिर्णयाभावस्यासिद्धिवेद् तावपि पर्वतो वह्निमा
न् धूमादित्यादौ सद्धेतावत्थीपतदुभयनिर्णयाभावदशायामिति शेषः । तदाभासस्यापि पर्वतो वह्निमानाकाशादित्यसिद्धहेता
वपि स्थीपक्षमात्रवृत्तदुभयनिर्णयदशायामिति शेषः । हेतुत्वसद्धेतुत्वं न च भ्रममात्रवृत्तदुभयप्रनिर्णयदशायामप्यसाधारणं
विरोधान्यतरहेत्वाभासत्वप्रयोजकरूपस्याव्यर्थसत्त्वेन सद्धेतुत्वासंभव इति वाच्यं । पक्षवृत्तित्वे सति साध्यव्यापकीभूताभा
वप्रतियोगित्वरूपस्यासाधारणपक्षवृत्तित्वे सति साध्यवद्वृत्तित्वस्य पूर्वोक्तविशेषणस्य विरोधिस्वतन्त्रासत्वादिति भावः ।
कुचित्तु । हेतुत्वमिति तस्य सिद्धिमूलहेतुत्वमित्यर्थः । इत्याद्युः । अपामिति । पूर्वोक्तं च न हेत्वाभासलक्षणामिति भावः । न
चेति । तदुभयप्रकारकनिर्णयमित्यर्थः । तदभावस्य तदभावस्यापि । क्वापीनुत्पादकत्वादिति क्वापीनुत्पत्तिप्रयोजक
त्वादित्यर्थः । अत्रैवेति । असिद्धावेवेत्यर्थः । व्याप्तिपक्षधर्मतानिर्णयाभावेनैवानुमित्यभावसंभवादिति भावः । ननु प्रति
बंधकीभूतासिद्धत्वज्ञानोपजीव्यतया व्यभिचारादिदोषस्य तत आह असिद्धेरिति । तज्ज्ञानार्थं प्रतिबंधकीभूततत्त्वज्ञा
नार्थश्चानुद्भावनात् तस्मान्न भेदः ।।। ननु प्रतिबंधकीभूतासिद्धिज्ञानं प्रति व्यभिचारादेरनुपजीव्यत्वेपि असिद्धिस्वरू
पे तस्योपजीव्यत्वमस्त्येव व्याप्तिः पक्षधर्मतानिर्णयरूपासिद्धिप्रतिबंधकत्वेनैवासिद्धिस्वरूपोपजीव्यत्वात् तत्पृथक्

म०पु षत्वमिष्यत एव आह पादिचेति । तस्मा व्यभिचारादिज्ञानात् असिद्धिः व्याप्तिपक्षधर्मतानिर्णायकः तस्य व्यभिचारादेः उपजीव्य
३६ त्व असिद्धिस्वरूपे उपजीव्यत्वस्य एवेत्येव व्यारोभिलक्रमे दोषद्वयं न तत्र प्रयोज्यः । सप्रत्यक्षदोष एव स्यादित्यर्थः । तद्रूपेऽप
जीव्यत्वोत्तत्प्राच्य हेत्वाभासाधिक्यापत्तिरिति भावः । नन्वसिद्धिपूर्वं व्याप्यत्वासिद्ध्यादिज्ञानाभावापेक्षोपजीव्यत्वं न तु व्यभिचा
36 रादावपि तु त्वयत ज्ञानार्थं तत्स्वरूपनिर्वाहार्थं च तत्पूर्वं तज्ज्ञानस्यावश्यकत्वादित्यत आह व्याप्तिसिद्धेरिति व्याप्यत्वासिद्ध्या
दिज्ञानं व्याप्यत्वासिद्ध्यादिज्ञानमपि । दूषणांतरमाह पूर्ववदेवेति पूर्वमित्यर्थः । हेतुत्वात् अभासत्वात् तद्रूपोपरक्तस्य हेतुत्वात्
अन्योन्याभाववत्त्वेनाव्याप्यवृत्तिरिति भावः । किंच यदि व्यभिचारादेरसिद्धिस्वरूपप्रत्युपजीव्यतयैव हेत्वाभासत्वं तद्व्यभि
चारादिहेतोस्सद्धेतुत्वात् अन्योन्याभाववत्त्वे नाव्याप्यवृत्तिरिति भावः । किंच यदि व्यभिचारादेरसिद्धिस्वरूपं प्रत्युपजीव्यतयैव ह
त्वाभासत्वं तद्व्यभिचारादिहेतोस्सद्धेतुतादशापि व्यभिचारादेः सिद्धिविघटकत्वाभावे नासिद्धिस्वरूपोपजीव्यत्वाभावा
त्तस्य तदानीतनहेतुदोषत्वाभावप्रसंगः तस्य तदानीतनहेत्वाभासत्वाभावे तत्सत्त्वे न तद्धेतोर्दुष्टता वपि तदानीतनहेत्वाभा
सत्वं न स्यात् तथा च व्यभिचारादिहेतोर्नित्यदूषकत्वभंगप्रसंग इति दूषणांतरमाह व्यभिचारादेरिति सहेतोः व्यभिचारादि
हेतोः सद्धेतुत्वस्य तादृशापि व्यभिचारादिहेतोर्व्याप्तिपक्षधर्मतानिर्णयपदशापामितियावत् सिद्धिमस्त्वेव व्याप्तिपक्षधर्म
तानिर्णयरूपासिद्धिं अघटकः हेत्वाभासत्वाभावात् तत्तदानीतनहेतुत्वेति सत्त्वाभावस्वरूपयोग्यत्वस्य तदानीमप्रि
सत्त्वादवतदानींतनहेतुदोषत्वसंभवात् न तत्सबंधे न तद्धेतोः हेतावपि तदानींतनहेत्वाभासत्वमेव दृढं हेत्वात् अन्यथासिद्धेराम
तित्तपेपि व्याप्तिपक्षधर्मतानिर्णयात्मकसिद्धिविघटकत्वस्यैव व्यभिचारादेर्हेतुदोषतापेक्षतत्त्वानुपोगस्यहेतुलक्षणत्वात् तु किंचिद्

हेतुतदाभासविवेकः इति पर्वतो वह्निमान् धूमादित्यादेः सद्धेतुभिन्नत्वादेव सद्धेतुभिन्नत्वे न दुष्टत्वात् गोत्वान्
श्वत्वात् इत्यादेः असद्धेतुभिन्नत्वेन व्यवहारः इत्यर्थः। सिद्धसाधनं इत्यत्र पूर्ववत्। ननु सिद्धिसत्त्वे दुष्टप्रोक्तसद्धेतुत्वादित्यपु
नः सिद्धिसत्त्वेपि दुष्टस्य तावदव्यभिचारादिदोषकत्वे न दुष्टत्वादित्यत आह व्यभिचारादेरिति अप्रयोजकत्वा। न च व्याप्तेः
वयोज्यः व्यभिचारादेरपीत्यर्थः। सद्धेतौ सद्धेतुत्वं यद्यपि सत्त्वव्याप्तिपक्षधर्मतानिर्वापरूपसिद्धिसत्त्व इतियावत् सिद्धिमत्त्वमुप
: व्याप्तिपक्षधर्मतानिर्वापरूपासिद्धिमति घटपटः हेत्वाभासत्वप्रयोजकत्वाभावात् तद्भवेत् न पक्षसिद्धिविघटकत्वरूपस्यासिद्ध्यु
पजीव्यत्वे सत्येव व्यभिचारादेः हेतुदोषत्वप्रयोजकत्वादिति भाव इति व्याचक्षुः। व्याप्तिपक्षधर्मतासत्त्व इति व्याप्तिपक्षधर्म
तासत्त्वेपीत्यर्थः। तथाच हेत्वाभासादिति अनुमित्युपादानस्य हेत्वाभासप्रयोजकत्वावधारणादित्यर्थः। तथापीति। तत्रानुमि
त्यनुत्पादस्य हेत्वाभासप्रयोजकत्वान्यथानुपपत्तेरिति भावः। हेत्वाभासलक्षणाधिकमिति। व्याप्तिपक्षधर्मादेरिति इति
हेत्वाभासत्वमित्यर्थः। लक्षणान्तर्भाव इति। कस्मान्नाव्यभिचारादौ नाम सिद्धेः तमीवयपर्थः तेन रूपेण तत्साधनाव्याप्य
सिद्ध्याद्यन्यतमत्वरूपेणाव्याप्यासिद्ध्यादेरेवेति व्याप्तिनिर्वापाभावादेरित्यर्थः। संग्रहाति विभागस्यापि क्षिप्येतस्स
ह्रात। एवं च व्यभिचारादिस्वरूपे दः। असिद्धिः स्यादिति। असिद्धत्वेनैव सर्वेषां हेतुता विभक्तः स्यादित्यर्थः। उपजीव्य
दिति असिद्धिस्वरूपं प्रागुपजीव्यत्वादित्यर्थः। भेदः पृथक् विभाजने पृथक् विभक्तः स्यात्। नन्वेवं व्याप्तिपक्षधर्मताम
त्वेपि सुपुष्यासौ कथमनुमित्यभावः हेत्वाभासाभावादित्यत आह मुख्यस्येति विधिकारणाभावप्रयोजकत्वम् (?)

म॰ पु॰ भावान्न कारणाभावादेव विभावरूपकारणाभावादपि स्यादिति शेषः। अनुमित्यनुत्पादे अनुमित्यनुत्पादप्रयोजकमेतद्व्यति
३७ रेकेणेति। आत्ममनोयोगादिव्यतिरेकेणेत्यर्थः। व्यतिरेकेणाव्याप्तेरनुत्पादात् तत्स्वरूपे वचकारणत्वादिति भावः। ननु पक्षमेवेदमि
37 त्यत आह सिद्धेरेवेति। व्याप्तिपक्षधर्मताज्ञाने पक्षे वेत्यर्थः। हेतुः स्यादिति सर्वहेतुः इत्यादीत्यर्थः। तथा च कूर्पीनिष्कारणकं
स्यादिति भावः। इदमनुमापातततः। अत एतेऽपि तत्र आत्ममनोयोगोपि हेतुः। इतरकारणसत्त्वे व्यतिरेकेणानुमिति व्यतिरेकासि
द्धेः। अथानुमित्यादिकं मनस एवापि कारणं तन्त्रभावकार्यत्वादित्यनुमानान्तरसिद्धिः तत्रात्ममनःपि तुल्यं चरमेऽप्यपि कार्यमेव
कारणानुमितिव्याप्तेर्व्याप्तिज्ञानादेः कारणतासिद्धेः। अन्यथा तदापि व्याप्तिज्ञानादिकं कारणं न स्यात् परामर्शादौ तत्कारणत्वेऽस
तितद्व्यतिरेकेणानुत्पत्तिव्यतिरेकाभावात् तस्मात् अर्थतस्तादृशव्याप्तिर प्रयोजितकार्यमेव तत्त्व॥ वृत्ति तु हेत्वाभाससामान्यलक्षणमव
शेषलक्षणानि च प्रकारान्तरेणाह तत्रानुमितमनुपपत्त्यसति अन्यत्वेति। अत्र गमते पापवृप्रतिबन्धी च तद्व्याप्तिपक्षधर्मता
विरहश्चागमकत्वे पापि क प्रतिबन्दि व्याप्तिपक्षधर्मताविरहत्वात् एवं पक्षधर्मताविरहं चतात्वेऽपि पक्षत्वात् एवं पक्षधर्मतादिर
हतन्ति पतेहेतोतपारिस्येकवच नान्ते तरतेर हेतुगमतावतवं सूह इति नेवड्डवचनापत्तिरिविड्बयो॥ न परामर्शात्मकका
रणाभावात् कारणाभावादेवपि भावरूपेकारणाभावादपि स्यादिति शेषः। अनुमित्यनुत्पादे अनुमित्यनुत्पादप्रयुप
गमेतद्व्यतिरेकेणेति। आत्ममनोयोगादिव्यतिरेकेणेत्यर्थः। पव्यतिरेकेणाव्याप्तेरनुत्पादात् तत्स्वरूपे वच्च कारणत्वादिति भावः। ताम
नन्वि पक्षमेवेदमित्यत आह सिद्धेरेवेति। व्याप्तिपक्षधर्मताज्ञाने सति पक्षे वेत्यर्थः। हेतुः स्यादिति सर्वहेतुः इत्यादीत्यर्थः तथा ३७

चकार्यंनिष्ठकारणताकं स्यादिति भावः ॥ इदमापाततः । भवन्मतेऽपि कृष्यमात्रमनोयोगो हेतुः । एतत्कारणतासत्त्वे तद्व्यतिरेके कारणा
नुमितिव्यतिरेकासिद्धेः । अथानुमित्यादिकं समवायिकारणजन्यं भावकार्यत्वादित्यनुमानात्तत्सिद्धिः तत्सममापि तु
ल्यं तत्र मेत्यपि कार्यस्य कारणानुमितिव्याप्त्यादिज्ञानादेः कारणतासिद्धेः । अन्यथा तत्र वापि व्याप्तिज्ञानादिकं कारणं स्या
त् परामर्शादीनां कारणत्वे सति तद्व्यतिरेके कार्यव्यतिरेकाभावात् परमार्थस्तु तादृशव्याप्तिरप्रयोजिकेत्येव त
त्वात् । किंचित्तु हेत्वाभाससामान्यलक्षणं तद्विशेषलक्षणानि च प्रकारान्तरेण उक्तान्नमतमनुपपन्नमपि तेऽत्रेत्येत्विति । अत्र
न गमकतेऽपि पिविकप्रतिबंधीच तत्तव्याप्तिपक्षधर्मताविरहव्यगमकतोऽपि पिविकप्रतिबंधे व्याप्तिपक्षधर्मताविरहतादृशपक्षप
क्षधर्मताविरहं तल्लिंगापक्षतादृशपक्षधर्मताविरहतल्लिंगतेद्धेतोतयोरित्येकवचनात्तेतरतेरहृद्गर्भेतावतवदहेरिति नवद्
वचनापत्तेरिति द्रष्टव्यं ॥ तथाच गमकतौपयिकप्रतिबंधी व्याप्तिपक्षधर्मताविरहतद्व्याप्यान्यतमत्वं हेत्वाभाससामान्य
लक्षणमित्यर्थः । गमकतौपयिकप्रतिद्वंद्वित्वंच साक्षादनुमितिप्रतिबंधकत्वं गमकतौपयिकस्याबाधितत्वासत्प्रतिप
क्षितत्वस्य विरोधित्वमित्यपि बोध्यं तात्तत्रेति बुमध्ये समानाधिकबलाविति समानाधिकबलप्रतिद्वंद्विनो बाधप्रतिरो
ध्यवित्ति यो जना समानबलप्रतिद्वंद्वी प्रतिरोधः अधिकबलप्रतिद्वंद्वी बाध इत्यर्थः ॥ समानबलप्रतिद्वंद्वीचेतन्मते प्रतिरोधं
त गतिमेव वक्ति नसाक्षादनुमितिप्रतिबंधकतावच्छेदकत्वमिति भावः । तल्लिंगतो व्याप्तिपक्षधर्मता व्याप्योसव्यभिचारादि ते
धर्मसंप्रधानोनिर्देशः । ननु पदितोतल्लिंगतोतदानडन्यपनद्वितीयेदोषत्वसंभवः । तल्लिंगतो व्याप्तिपक्षधर्मताव्याप्योस

म॰ पु॰
३२
३६६

व्यभिचारेति धर्मिप्रधानो निर्देशः। ननु पद्वितीयतत्तृतीयतो तदा तदुल्लपनद्वारि वैदोष्यत्वसंभवेन कथं तयोः पृथग्दोषत्वमु
पपद्यते इत्याशंक्य निराकरोति नन्वेति। व्याप्तिग्रहांतर्भावः व्याप्तिग्रहोल्लपनद्वारा हेत्वाभासत्वं न तयोः व्यभिचारविरुद्धयोः त्वं
तं अयौ वेति व्याप्त्यादिविरहनिरूपं विनैकपार्थः व्याप्तिविरुद्ध व्याप्यत्वेनेत्युपलक्षणं। व्यभिचारित्वेनेत्यपि बोध्यं।
नन्वेवं व्याप्तिपक्षधर्मताविरहत्वमेवासिद्धित्वलक्षणाप्यवसितं तत्तद्धेतुष्वितमेवेत्यत आह अन्यत्रापीति। अस्ति नम
ते पीत्यर्थः। उक्तमिति तिअ ननुगतरूपं हृषरामित्यर्थः नत्वन्यतरत्वेनानुगमो, त्विसतत्प्राह अन्यतरत्वं चेति। अ
साधकतानुमाने ऽन्यतरत्वरूपविशेषणास्य व्यर्थत्वादिति वृं व्याप्तित्वाद्यवच्छिन्नप्रतियोगिताकाभावत्वेनैवगम
कत्वसंभवादिति भावः। ननु विशिष्टाभावस्य सामान्यलक्षणाघटकत्वेन तु व्याप्त्यादिप्रत्येकाभावः तथात्वविशिष्टाभा
वस्यैवासिद्धित्वेन व्याप्यादिप्रत्येकाभावस्यातथात्वात्तानुननुगम इत्यत आह हेत्वाभासातरेति वदद्भिः हृतस्य
भिन्नस्याविवक्षितत्वात् अत्र यथा हेतुः सिद्धित्वेन विवक्षितत्वात् तत्र व्याप्यतासिद्ध्यादिकमेवेति। ननु विशिष्टाभावत्व
र्थः। आदिपदग्राह्या व्याप्त्यादिप्रत्येकाभावपरिग्रहः। अत इति पूर्वपक्षहृदयं॥ ॥ज्ञानादीति प्रत्यक्षोक्तो ज्ञानादीति म्य
र्थः। तेनो ज्ञावनादितिसंगच्छते॥ एवमग्रेपि विशिष्टाभाव इति व्याप्तिविशिष्टपक्षधर्मताभाव इत्यर्थः। एवं च ह्मसा
ध्यव्याप्यहेतुमान्पक्ष इति पक्षवृत्तित्ववान् हेतुरिति परामर्शस्यापि हेतुत्वेन पेनुविशिष्टाभावकेतुरपि दोषः इत्युक्त राम
म ध सत्ता। परामर्शविषयाभावो वेति। परामर्शविषयप्रतियोगिकाभावत्वेन व्याप्त्यादिप्रत्येकाभावो वेत्यर्थः। दोष ३२

त्यनुषज्यते । व्यर्थविशेषणत्वात् विशिष्टाभावत्वपरामर्शविषयप्रतियोगित्वरूपस्य विशेषणांशस्य हेत्वाभासतानापा
मप्रयोजकत्वात् तेन रूपेण ज्ञानस्य प्रतिबन्धकत्वादिति भावः ॥ न चैवं तद्रूपेण ज्ञानादिसत्वे ऽप्यनुमितिः स्यादित्य
त आह तस्येति प्रतिबन्धकत्वे तद्रूपेण ज्ञानमुद्भाव्य न बाधकमित्यर्थः । तथा च तद्रूपेणानापन्नानुमितिप्रतिब
न्धकत्वं चापि तस्याकारकज्ञानमुद्भावनं न बाधकमित्यर्थः । तथा च तद्रूपेण ज्ञानादिसत्त्वे ऽनुमिता विप्रतिपत्तिरिति भा
वः । केचित्तु तद्रूपेण ज्ञानस्यानुमितिप्रतिबन्धकत्वे हेतुमाह तस्येति । तेन रूपेण ज्ञानं उद्भावनं वा क्वाप्यनुमितिप्रतिबन्धकं
भवतीत्यनुभवः कल्प्यते तस्य तत्राह अनुभवसिद्धेति । यत्प्रकारकज्ञानादनुमितिप्रतिबन्धे ऽनुभवसिद्धेत्यर्थ
ः । लक्षणे तत्तत्स्यानुमितिप्रतिबन्धकतावच्छेदकत्वान्नानुपपत्तिः । प्रत्येकमेव दोषत्वेन तत्साधारणैकरूपाभावेन
विभागस्यैवानुपपत्तेः पञ्चानां मध्ये कस्याप्युद्देश्यहेत्वाभासव्यतिरिक्तत्वं नास्तीत्यत आह परामर्शविषयेति । परामर्शवि
षयाभावत्वेनानुगतेनासिद्धत्वेन तत्पञ्चानां सङ्ग्रह इति योजना । विरोधो न्यूनत्वं हेत्वाभासाधिकं न वेति तत्पञ्चानामप्य
कपक्षस्य द्विधोद्देश्यहेत्वाभासव्यतिरिक्तत्वमित्यर्थः । ननु परामर्शविषयाभावत्वं परामर्शविषयत्वावच्छिन्नप्रतियोगि
काभावत्वं तच्च प्रतियोगिकाभावत्वमसाधारणानैकान्तिकाद्यादिप्रकारकाभावे ऽव्याप्तेः तादृशाभावस्याप्रसिद्धेरन्यथा प्रप
योगित्वप्रत्ययपरामर्शविषयेनानात्वादतः परामर्शविषयस्याभावस्यैव सर्वत्र वृत्तेः न दोषः । वैशिष्ट्यव्यासज्यवृत्ति
धर्मावच्छिन्नप्रतियोगिताकव्याप्याद्यभावे केवलसाध्याभावसाधनाभावादौ चानाभासेऽतिव्याप्तेः अथ हेत्वाभासाव

सतिपरामर्शविषयप्रतियोगिकाभाववत्त्वमसिद्धित्वमिति नाभासभिन्नेऽतिव्याप्तिः परामर्शपदं च साध्यव्यभिचरितहेतु
मान्पक्ष इत्याकारकव्यतिरिक्तविषयकान्वयव्याप्तिघटितपरामर्शपरं अतो हेतुनिष्ठव्यतिरेकव्याप्त्यभावरूपेऽनुपसं
हारित्वे नातिव्याप्तिः समममपरामर्शरूपाभावस्य घटकतया हेतुनिष्ठसाध्याभाववद्वृत्तित्वरूपसाधारणत्वे नातिव्याप्ति
ः तस्याभाववत्त्वादिति चेन्न गोत्ववानश्वत्वादित्यादौ हेतोः साध्यसामानाधिकरण्याभावरूपविरोधे देवनिर्मानत्व
मादित्यादौ पक्षत्वाभावस्य साध्यतातत्र पक्षवृत्तिसाध्याभावरूपे बाधे गोत्वाभावः साध्यमादिमान्गोत्वाभावादित्यादौ प
